॥का॥ वी॥ ॥दिवाचरा रात्रिचराये च संध्यासु दारुणाः॥ प्रमत्तमप्रमत्तं वा ये स्मान्बाधितुमुद्यताः॥९४॥ ते सर्वे हि हयेंद्रस्य
॥९॥ धनुर्मुक्तशरार्दिताः॥ सहस्रं प्राणरूपन्तु भग्नसत्वबलोद्यमाः॥९५॥ ये सर्पा ये महानागा महागिरिबिलेशयाः॥
कालव्यालामहादंष्ट्रा महाजगरसंज्ञकाः॥९६॥ अनंतपूलिकाद्याश्च दंष्ट्राविषमहाभयाः॥ अनेकशतशीर्षाश्च
खरापुच्छाश्च दारुणाः॥९७॥ महाविषजलौकाश्च वृश्चिका रक्तपुच्छकाः॥ आशीविषाः कालकूटा महाहाला
हलाह्वयाः॥९८॥ जलसर्पा जलव्याला जलग्राहाश्च कच्छपाः॥ मत्स्यका विषपुच्छाश्च ये चान्ये जलवासिनः
॥९९॥ जलजाः स्थलजाश्चैव नानाभेदशतोद्भवाः॥ ये च षड्विंदवो लूताश्चामराः शुकपुच्छकाः॥१००॥ स्था
वरा जंगमाश्चैव कृत्रिमाश्च महाविषाः॥ उग्ररूपा उग्रविषा मूषिका गृहगोधिकाः॥१॥ नानाविषाश्च ये घोरा महो
पविषसंज्ञकाः ये स्मान्बाधितुमिच्छंति शरीरप्राणनाशकाः॥२॥ ते सर्वे कार्त्तवीर्यस्य खङ्ग साहस्र दारिताः॥ ह्रादे ॥ए प॥
वविनश्यंतु प्रनष्टंद्रियसाहसाः॥३॥ मनुष्याः पशवो वृक्षा वानरा वनगोचराः॥ सिंहव्याघ्रवराहाश्च महिषा ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येमहामृगाः ॥४॥ गजाश्वरंगागवयारासभाः शरभावृकाः ॥ भुजङ्काद्वीपिनः श्वभ्रामार्जाराविलमोलुपाः ॥५॥
शृगालाः शशकाः श्येनागरुत्मंतोविहंगमाः ॥ भेरुंडावायसागृध्राहंसाद्याः पक्षिजातयः ॥६॥ उद्भिज्जाश्चां
डजाश्चैवस्वेदजाश्चजरायुजाः ॥ नानाभेदकुलेजातानानाभावाः पृथक्विधाः ॥७॥ येसमान्वाधितुमिछंतिश
रीरप्राणनाशकाः ॥ तेसर्वेकार्त्तवीर्यस्यगदासाहस्रचूर्णिताः ॥८॥ दूरादेवविनश्यंतुविनष्टगतिपौरुषाः ॥ ये
चाक्षेमप्रदातारोदुष्टारोयेविदूषकाः ॥९॥ कृत्यायंत्रप्रकर्त्तारः कूटमायाविदश्चये ॥ मारणोच्चाटनोन्मूलद्वे
षमोहनकारकाः ॥१०॥ विश्वासघातकादुष्टायेचस्वामिद्रुहोनराः ॥ येचाततायिनोरिष्टायेपापापहारिणः
॥ दाहोपघातगरलशस्त्रपातादिदुःखदाः ॥ क्षेत्रवित्तादिहरणाबंधनादिभयप्रदाः ॥१२॥ ईतयोविविधाकारा
येचान्येदुष्टजातयः ॥ पीडाकरायेसततंक्षिप्रमिछंतिबाधितुं ॥१३॥ तेसर्वेकार्त्तवीर्यस्यचक्रसाहस्रचूर्णिताः ॥
दूरादेवविनश्यंतुक्षयंयांतुसहस्रधा ॥१४॥ येमेघायेमहावर्षायेवातायाश्चविद्युतः ॥ येमहाशनयोदीप्तायेनि

॥का॥वी॥
॥७०॥

र्गताश्च दारुणाः॥१५॥उल्कापाताश्चयेघोरायेमहेंद्रायुधादयः॥सूर्येंदुकुजसौम्याश्चगुरुकाव्यशनैश्च
राः॥१६॥राहुश्चकेतवोयेचनक्षत्राणिचराशयः॥तिथयःसंक्रमामासाहायनायुगनायकाः॥१७॥मन्वंत
राधिपाःसिद्धाऋषयोयोगसिद्धयः॥निधयोऋग्यजुःसामाःथर्वणाद्याश्चवह्नयः॥१८॥ऋतवोलोकपालाश्च
पितरोदेवसंहतिः॥विद्याश्चैवचतुःषष्टिभेदास्तथाभुवनत्रये॥१९॥एतेवैकीर्तिताःसर्वेयेचान्येनानुकीर्तिता
तेसंतुनःसदासौम्याःसर्वकालसुखावहाः॥२०॥आज्ञयाकार्त्तवीर्यस्ययोगींद्रस्यामितद्युतेः॥ॐकार्त्तवीर्या
र्जुनोधन्वीराजेंद्रोहेहयेश्वरः॥२१॥दत्तात्रेयप्रियतमःसहस्रभुजमंडितः॥चापीखड्गीरथीबाणीतूणीवर्मी
महाबलः॥२२॥सुभुजस्सुमुखश्शांतश्चक्रवर्तीगुणाकरः॥दशास्यदर्पहारीवालीलाछन्नःसुदुर्जयः॥२३॥
दुःखहाचोरदमनोराजराजेश्वरःप्रभुः॥सर्वज्ञःसर्वदःश्रीमान्सर्वशिष्टेष्टदःकृती॥२४॥राजचूडामणिर्यो
गीसप्तद्वीपाधिनायकः॥विजयीविश्वजेतावाग्मीमहागतिरलोलुपः॥२५॥यज्वाविप्रप्रियोविद्वान्ब्रह्मण्यस्सत्य

॥राम॥
॥७०॥

ःसनातनः॥ माहिष्मतीपतिर्योह्यामहाकीर्त्तिर्महार्जुनः॥२६॥ उक्कमारोमहावीरोमारीघ्नोमदिरेक्षणः॥ मात्तघ्नः
शाश्वतः शूरः शंखभृद्योगिवल्लभः॥२७॥ महाभागवतोधीमान् महाभयविनाशनः॥ आसाध्यविग्रहोदिव्य
भावोव्याप्तजगत्त्रयः॥ सर्वशास्त्रकलाध्यक्षोविराजोलोकवंदितः॥ वीरोविमलसत्वाढ्योमहाबलपराक्रमः
॥२८॥ विजय श्रीमयोमान्योजितारिर्मन्त्रनायकः॥ खड्गभृत्कामदः कान्तः कालघ्नः कमलेक्षणः॥३०॥
भद्रवादप्रियोवैद्योविबुधोवरदोवशी॥ जितेंद्रियोजितारातिः स्वछंदोनंतविक्रमः॥३१॥ चक्रभृत्परचक्रघ्नः
संग्रामविधिपूजितः॥ महाधनोनिधिपतिर्महायोगोगुरुप्रियः॥३२॥ योगाढ्यः सर्वरोगघ्नोराज्जिताखिलभूत
लः॥ दिव्यास्त्रभृदमेयात्मासर्वगोप्तामहोज्वलः॥३३॥ सर्वौषधधरोभीष्टप्रदः परपुरंजयः॥ योगसिद्धोम
हाकायोमहादंष्ट्रानताधिपः॥३४॥ सर्वज्ञाननिधिः सर्वसिद्धिदानकृतोद्यमः॥ इत्यष्टशतनामोक्ता मूर्त्तयो
दशादिभूपते॥३५॥ सम्यग्दृशादिशोव्याप्य पालयंतचमांसदा॥ शेषायामूर्त्तयोष्टौचदिक्पालेशोवभास्वराः

॥का॥ वी॥
॥७७॥

॥३६॥ अग्निनिर्ज्ञतिवाय्वीशकोणगाः पांतु मां सदा॥ स्वस्थाः सर्वेंद्रियाः संतु शांतिरस्तु सदा मम॥ ३७॥ मम
सौख्यमसंबाधमारोग्यमपराजयः॥ दुःखहानिरविघ्नश्च प्रजावृद्धिः सुखोदयः॥ ३८॥ वांछाप्तिरतिकल्याण
मवैषम्यमनामयम्॥ अनालस्यमभीष्टं च मृत्युहानिर्बलोन्नतिः॥ ३९॥ भयहानिर्यशः कीर्त्तिर्विद्यावृद्धिर्महा
श्रियः॥ अनष्टद्रव्यता चैव नष्टस्य पुनरागमः॥ ४०॥ दीर्घायुष्यं महोत्साहं सौकुमार्यमभीप्सितम्॥ अप्रधृष्य
तमत्वं च महासामर्थ्यमेव च॥ ४१॥ संतु मे कार्त्तवीर्यस्य हैहयेंद्रस्य कीर्त्तनात्॥ य इदं कार्त्तवीर्यस्य कवचं पुण्य
वर्द्धनम्॥ ४२॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनम्॥ सर्वशांतिकरं गुह्यं समस्तभयनाशनम्॥ ४३॥ विजया
र्थप्रदं नृणां सर्वसंपत्प्रदं शिवम्॥ शृणुयाद्वापि सर्वान्कामानवाप्नुयात्॥ ४४॥ मुच्यते सर्वपापेभ्यः सर्वत्र
विजयी भवेत्॥ मारीचौरादिपीडाद्यैर्न कदाचित्प्रबाध्यते॥ ४५॥ पठतः प्रातरुत्थाय दुःस्वप्नादि विनश्यति ॥राम॥
॥लभते वांछितानर्थान्मुच्यते चिरशौरपि॥ ४६॥ शय्यातलगतो रात्रौ य इदं कवचं पठेत्॥ न तस्य तस्कराराति ॥७७॥

द्वापर्ठे २

CC-0. In Public Domain. Digitization by eGangotri

दुःस्वप्नादिकृतं भयम् ॥ ४७ ॥ चौरैर्हृतं यदा पश्येत्पश्चादिधनमात्मनः ॥ सप्तवारं तदा जप्यान्निर्गिपश्चि
मदिङ्मुखः ॥ ४८ ॥ सप्तवारेण लभते नष्टद्रव्यं न संशयः ॥ सप्तविंशतिधा जप्यात्प्राचीदिग्वदनो यदि ॥ ४९ ॥
तदा देवासुरैर्निर्भंपरचक्रं निवारयेत् ॥ विवादे कलहे घोरे पंचधा यः पठेदिदं ॥ ५० ॥ विजयो जायते तस्य
न कदाचित्पराजयः ॥ सम्यक्द्वादशधा रात्रौ यो जपेद्बंधमुक्तये ॥ ५१ ॥ त्रिदिनान्निगडग्रस्तो मुच्यते
न विचारणा ॥ अनेनैव विधानेन सर्वसाधनकर्मणि ॥ ५२ ॥ असाध्यमपि सप्ताहान्साधयेन्मंत्रवित्तमः ॥ या
त्राकाले पठित्वेदं मार्गे गच्छति यः पुमान् ॥ ५३ ॥ न तस्य चोरव्याघ्राघेर्भयं स्यात्परिपंथिभिः ॥ नित्यं गृह
गतो जप्त्वा कल्याणैः परिपूर्यते ॥ ५४ ॥ न भयं जायते तस्य दुष्टसत्वादिभिः क्वचित् ॥ सर्वरोगप्रयोगेषु त्रि
धा वा पंचधा पठेत् ॥ ५५ ॥ स रोगमृत्युवेतालभूतप्रेतैर्विमुच्यते ॥ जपन्नासेचनं कुर्याज्जलेनांजलिना ततो
॥ ५६ ॥ न चासौ विषजान्यादिरोगस्फोटैः प्रबाध्यते ॥ त्रिसंध्यासु पठित्वेदं षण्मासं विजितेंद्रियः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥का॥वी॥ कालमृत्युभयंतस्यनभवेन्नात्रसंशयः ॥ पठतःकवचंह्येतद्विघ्नंनाक्रमतेतनौ ॥ ५८ ॥ नजाड्यांधकमूकत्वंनोप
॥१२॥ सर्गभयंक्वचित् ॥ विंशत्य रोक्तविधिनाध्यात्वादेहंतदात्मकम् ॥ ५९ ॥ मंत्रीगुरुप्रसादाप्तंमंत्रराजंजपेत्पुनः
॥ कवचेनावृतोभूयोमंत्रध्यानंसमाचरेत् ॥ ६० ॥ आदौसंबोधनंकृत्वातन्नामध्यानपूर्वकम् ॥ चतुरक्षकमंत्रार्णा
न्युच्चरेद्बीजपूर्वकान् ॥ ६१ ॥ शरीरेन्यासमेवंहियःकरोतिसमाहितः ॥ यथोक्तंलभतेसद्यःफलंवज्रतनुर्भवेत् ॥ ६२
॥ यथानथेदंकवचंकस्यचिन्नप्रकाशयेत् ॥ गोपनीयंप्रयत्नेनशिवस्यवचनंयथा ॥ ६३ ॥ शुभक्तायशिष्यायद
नां ४ द्यात्सर्वस्वदायिने ॥ साधकानांहितार्थाययदुक्तंचंद्रमौलिना ॥ ६४ ॥ कार्त्तवीर्यस्यकवचंयदुक्तंवैमयातव ॥ येनसं
रक्षितोदेविकालेनापिनजीर्यते ॥ ६५ ॥ तस्मात्सर्वप्रयत्नेनकवचंधारयेत्सुधीः ॥ यशस्यंस्वर्गमायुष्यंपुत्रपौत्रप्र
वर्द्धनम् ॥ ६६ ॥ कार्त्तवीर्यःखलद्वेषीकृतवीर्यसुतोवली ॥ सहस्रबाहुःशत्रुघ्नोरक्तवासाधनुर्द्धरः ॥ ६७ ॥ रक्तगंधो ॥राम:॥
रक्तमाल्योराजास्मर्तुरभीष्टदः ॥ द्वादशैतानिनामानिकार्त्तवीर्यस्ययःपठेत् ॥ ६८ ॥ संपदस्तस्यजायंतेजनास्तस्य ॥१२॥

वक्षोसदा॥ ६९॥ ॐ अस्मात्सर्वभयात्प्रभाकरनिभः प्रद्योतनो द्योतितः स्वर्गस्रक्परिवीतकंधरधरो रक्तांशु
कोत्क्षीपवान्॥ नानाकल्प विभूषितः करसहस्राद्दीप्तबाणासनो बाणाद्दीप्तसहस्रबाहुरनिशं भूव द्द्वा
भीनः प्रभुः॥१२०॥ इति श्रीउड्डामरेश्वरतंत्रे पार्वतीश्वरसंवादे श्रीकार्त्तवीर्यार्ज्जुनकवचं समाप्तं शुभमस्तु॥
ॐ कार्त्तवीर्याय विद्महे महादेवाय धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ ॐ अस्य श्रीकार्त्तवीर्यार्ज्जुनमंत्रस्य श्रीभ
गवान्दत्तात्रेय ऋषिरनुष्टुप्छंदः श्रीकार्त्तवीर्यार्ज्जुनो देवता॥ ह्रां बीजं॥ ह्रीं शक्तिः॥ श्रीं कीलकं मम शत्रु चौ
रराजमुखजिह्वास्तम्भने श्रीकार्त्तवीर्यार्ज्जुनप्रीतये जपे विनियोगः॥ अथ न्यासः॥ ॐ ह्रां अंगुष्ठाभ्यां नमः॥ ॐ ह्रीं
तर्जनीभ्यां नमः॥ ॐ ह्रूं मध्यमाभ्यां नमः॥ ॐ ह्रैं अनामिकाभ्यां नमः॥ ॐ ह्रौं कनि ष्ठिकाभ्यां नमः॥ ॐ ह्रः करत
लकरपृष्ठाभ्यां नमः॥ ॐ ह्रां हृदयाय नमः॥ ॐ ह्रीं शिरसे स्वाहा॥ ॐ ह्रूं शिखायै वषट्॥ ॐ ह्रैं कवचाय हूं॥ ॐ
ह्रौं नेत्रत्रयाय वौषट्॥ ह्रः अस्त्राय फट्॥ ॥अथ ध्यानम्॥ सहस्रबाहुं सशरं सचापं रक्तांबरं रक्तकिरीटकुण्ड

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥का वी॥
॥१२॥

लम्॥ चौरादिशत्रुभयनाशनमिष्टदं तं वन्दे महाबलविजृंभितकार्त्तवीर्यं ॥ अथ मूलमंत्रः ॥ ॐ ह्रीं ह्रीं हूं हैं हैं क्लौं
स्वाहा ॥ ॐ कार्त्तवीर्यार्ज्जुनो नाम राजा बाहुसहस्रवान्॥ तस्य स्मरणमात्रेण हृतं नष्टं च लभ्यते ॥ श्रीमूलमंत्रः॥
ॐ कार्त्तवीर्यसुतो राजा सहस्रभुजमंडितः॥ अवतारो हरेः साक्षात्पालयेत्सकलं मम॥ १॥ इति श्रीकार्त्त-
वीर्यार्ज्जुनध्यानध्यानं संपूर्णम्॥ ॥

॥राम॥
॥१२॥

CC-0. In Public Domain. Digitization by eGangotri

८ नं० १५८४

॥ पालग्रहःस्तोत्र ॥

मूल्य रु ५।–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥बा॰ग्र॥ श्रीगणेशायनमः ॥ प्रयोगसारेबालग्रहःस्तवःप्रारम्भः ॥ प्रणम्यशिरसाशान्तंगणे
शानन्तमीश्वरम् ॥ बालग्रहस्तवंवक्ष्येसमस्ताभ्युदयप्रदम् ॥ १ ॥ तपसापशसादी
॥ १ ॥ प्त्यावपुषाविक्रमेणच ॥ पूजनीयसदास्कन्दःसनोदेवःप्रसीदतु ॥ २ ॥ रक्तमा
ल्याम्बरधरोरक्तगंधानुलेपनः ॥ रक्ताक्षीन्योज्वलःशान्तःसनो० ॥ ३ ॥ योनन्दनः
पशुपतेर्मातृणांपावकस्यच ॥ गंगोमाकृत्तिकानांचस० ॥ ४ ॥ देवसेनापरिक्षितो
देवसेनार्चितःसदा ॥ देवसेनापतिःश्रीमान्स० ॥ ५ ॥ शक्तिःशक्तिधरःशूरःकु ॥ १ ॥
मारःशिखिवाहनः ॥ सुरारिहामहासेनस० ॥ ६ ॥ प्रकम्पासुन्दरोदातादेवैःश्वर्यो ॥ रामः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दयान्वितः ॥ नानाविनोदसम्पन्नो मनो० ॥७॥ प्रबोधा च प्रबोधा जा बोधना सुप्र
बोधना ॥ प्रबुद्धा च प्रयोधा च सुश्रीना सुमनास्तथा ॥८॥ मनोन्मनीति विख्याता
योगिन्यः पान्तु बालकम् ॥ सुव्रता रुक्मिणी चैव मदवेगा विभीषणाः ॥९॥ वि
घ्नजिह्वा महानाशा शाना नन्दा तथा परा ॥ बालदा प्रमदा चेति योगिन्यः पांतु ॥
१०॥ हरिणी चाथ वाराही वानरी कोटुकी तथा ॥ कुबेरी कोटराक्षी च कुंभक
र्णी च चरिंडनी ॥११॥ बलाहिका हरिणी चेति योगिन्यः पां० ॥ शुद्धा विशुद्धा श्र
द्धा च योगसिद्धा मितंवदा ॥१२॥ शुभगा शुभदा गौरि वल्गा पिकरणीति च ॥

॥वा.ग्र॥ नानाविज्ञानविख्याता योगिन्यश्च ॥१३॥ लंम्बाफलंबाचनथा लम्बकर्णीच
लंबिनी ॥ ज्वालाकराली कालीन्द्री कालिकेलियथोदिता ॥१४॥ स्वछन्दा चा
॥२॥ रुसंपन्ना योगिन्यः पा० ॥ प्रणीताप्सुप्रणीता च मालिनी विश्वमालिनी ॥१५॥
विमला कमला माली लीला रौद्रा च विश्रुताः ॥ विचरन्त्यो यथाकामं योगिन्यः
॥१६॥ वायुवेगा महावेगा सुवेगा वेगवाहिनी ॥ शंखिनी हंसिनी हंसिः पुष्टि
पोषिक सिद्धिदा ॥१७॥ दिव्यानुभावकाहिन्यो योगिन्य० ॥ भ्रमणी भ्रामिणी
निम्ना निर्भिन्ना सुभगा गुहा ॥१८॥ ल्के दिनी द्राविणी वामा योगिन्य० ॥ रु ॥२॥
॥रामः॥

CC-0. In Public Domain. Digitization by eGangotri

द्रशाक्षिर्विनिष्क्रान्तमेकाक्षीतिक्रमोदितम् ॥ १९ ॥ योगिनीवृन्दमेतत्तु सि
द्धविद्याधरार्चितम् ॥ स्कन्दग्रहाधिदेवं तं बालैः ॥ २० ॥ शकुनी रेवती देवि शि
खा च मुखमण्डिका ॥ प्रलम्बा पूतनाख्या च कटपूतनिका पुनः ॥ २१ ॥ विजया
गोमुखा धूम्रा मुण्डमाला तथा परा ॥ अघोलंबा च पद्मा च मुकुन्दाप्यथ चा
म्बिका ॥ २२ ॥ तपिनी चैव काली च देवी प्रेतमुखी तथा ॥ ऐन्द्री मार्जारिका भ्रू
यःकुरंगी च जृम्भा स्कृशा ॥ २३ ॥ कालरात्री च मायावलो हिता पिलपिच्छिका ॥
भीमारणी च कवाटा भीषणा दुर्जया परा ॥ २४ ॥ तापिनी स्फटकोलि च मुण्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केशमिहावला ॥ अहंकारिजयानदजमेयाग्निर्दशिका ॥ २५ ॥ ऐंहिनीसुकु
॥ वा·ग्र· ॥ रामिख्यालललाटपिङ्गलातथा ॥ शीतलावालिनीचैवतापघ्नीपापराक्षसी ॥
॥ ३ ॥ २६ ॥ मानसीधनदादेवीचलनाचार्चनीतथा ॥ यमुनाजानवेदाचमालिनी
कलहंसिनी ॥ २७ ॥ वालिकादेवदूतीचवायसीपक्षिणीतथा ॥ स्वछंदपालि
कार्चैववामिनीचाम्बकेतिच ॥ २८ ॥ एतामातृकुलोत्पन्नाचतुःषष्टीसम
न्विताः ॥ योगिन्योनित्यसंतुष्टाःस्कंदापस्मारदेवताः ॥ २९ ॥ नानारक्षाधि ॥ ३ ॥
कारस्थावालकंपातुसर्वदा ॥ महालक्ष्मीर्महानाशामहासेनामहावला ॥ ॥ राम: ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२०॥ महाकंपा महाभीमा महातेजा महाबला॥ महासेना महाचण्डा महागृ-
ही वीरनायिका॥२१॥ एकवीरा विशालाक्षी सुकेशी सुमना तथा॥ सु-
केशिनी च संतुष्टा दंडिनी च विलंबिनी॥२२॥ भामिनी चार्थसौवर्णी
सिंहवक्त्रा कंकिनी॥ भ्रमरा चंचला चंपा चांडाला सिद्धिदा परा॥२३॥ श्रा-
कोदरी धृती: स्वाहा स्वधा स्वाच सनातनी॥ संवरा च तथा देवी नीलग्री-
वा तथाम्बिका॥२४॥ विमला गंधिनी वामा क्रीडंति चैव वाहिनी॥ क-
र्पिंगी मालती कुब्जा कालकर्णी च चर्चिका॥२५॥ चित्रानना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ बा॰ग्र ॥ गुह्याचेतिमार्वतीसंगमिर्गता । पंचाशन्नत्वसंपन्नाः शाकुनी देवताप्रिया
॥ ३६ ॥ योगिन्यकामरूपिण्यो पालकं पातु सर्वदा ॥ विध्वंसन्या प्रभावज्ञास
॥ ४ ॥ र्वज्ञा सर्वगायहाः ॥ ३७ ॥ दुर्गास्थरस्थनीज्येष्ठापमपमापरायणा ॥ प्रम
दा रौहिणी सीता प्रहूप्रज्याली निर्विभा ॥ ३८ ॥ विभूति विनतिः प्रीतिः प्र
कृतिः प्रमतीर्जया ॥ एता भगवता सृष्टा योगिन्यो योगसिद्धिदा ॥ ३९ ॥ पं
चविंशतिसंख्याता रेखातीशाङ्किगोचरा ॥ जगत्याप्यायनकरा बालकं पा ॥ ५ ॥
तु सर्वदा ॥ ४० ॥ नन्दश्रेष्ठेवो पनंदश्च गोमतिसुमतिस्तथा ॥ विपुष्टिर्हे ॥ रामः ॥

CC-0. In Public Domain. Digitization by eGangotri

महाकालकरालस्त्रिमिलोचनः ॥ ४१ ॥ तेजश्चंगे विरूपाक्षोगेमुखोव
उवामुखः ॥ कालानलः करालश्चबालकं पातु सर्वदा ॥ ४२ ॥ एते संके द
नोन्यत्राविएषोऽस्त्रराक्षसाः ॥ पूतना देवताज्येष्ठा बालकं पातु सर्वदा ॥
४३ ॥ वज्रिणी शाङ्खिनी चापादं डिनी खड्गिनी तथा ॥ पाशिनी ध्वजनी दे
वि गदिनी मुशलिनी तथा ॥ ४४ ॥ पद्मिनी चित्रिणी चेति सर्वा काराभयप्र
दाः ॥ एतान्दर्शने भिता देव्यो योगिनी देवकी सुतः ॥ ४५ ॥ अधिभूतप्रधानापा
पायान्साशांत पूतनाः ॥ प्रसन्ना मातरः सर्वा बालकं पातु सर्वदा ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थकोजलकोभूमाउग्रः स्कंदश्चकोर्जिताः ॥ वीरेशापितृभिः सर्पादे
॥बा॰ग्र॥ गमेसाधिदैवता ॥४७॥ पंचशक्तिप्रधानास्ते बालकं पांतु सर्वदा ॥ भैरवो
॥५॥ वीरभद्रश्च क्षेत्रपालाविनायकाः ॥४८॥ डाकिन्यो रुद्रशाकिन्यो यक्ष
राक्षसपन्नगाः ॥ खगाश्चावानराभूतीमनुष्या पशवो मृगाः ॥४९॥ सरि
त्पाच संतुष्टा बालकं पांतु सर्वदा ॥ आदित्या वसवो रुद्राः पितरो मरु 5
तस्तथा ॥५०॥ मुनयो मनवः कालाग्रहयोगासनातनाः ॥ सिद्धसा ॥५॥
ध्यश्च गंधर्वा देवपश्च्या स्मरसांगणाः ॥५१॥ विद्याधरा महादैत्या वा ॥राम:॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वालकं पातु सर्वदा ॥ सहजा योगजाश्चैव वीरजा मंत्रजास्तथा ॥ ५२ ॥ यो
गिन्यो योगविनयाना नाविभवगोचराः ॥ भावनामात्रसंतुष्टा वालकं पा
तु सर्वदा ॥ ५३ ॥ भूर्लोके च भुवर्लोके स्वर्लोके या भ्रमानराः ॥ अधश्चो
र्द्धं च तिर्यङ् च क्रीडन्यो ननमूर्तयः ॥ ५४ ॥ प्रज्ञा ज्ञा योगसम्पन्ना दिव्ये
श्वर्यसमन्विताः ॥ स्वछंदः पदसंभूते भैरवैपरिवारिता ॥ ५५ ॥ रक्षं
तु वालकं शीताः शान्तिमापन्नचेतसा ॥ दिव्यं स्तोत्रमिदं पुण्यं वाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ वाग्र ॥ क्षोधिकारकम् ॥ ५८ ॥ जपेत्संतानरक्षार्थं बालद्रोहे पशान्तिदम् ॥
॥ ६ ॥ ॥ ५९ ॥ इति प्रयोगसारे बालग्रहः स्तवः समाप्तम् शुभम् ॥ श्रीरामः ॥

॥ सम्वत् १९२५ साल ॥

॥ ८ ॥
॥ रामः ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ॐ नमः श्रीप्रत्यंगिरायै ॥ ॐ अस्य श्रीप्रत्यंगिरास्तोत्रस्य महादे
॥प्र॰ स्तो॥ वऋषिरनुष्टुप्छन्दः श्रीप्रत्यंगिरा देवता हूं बीजं स्वाहा शक्तिर्ममाभीष्टसिद्ध्यर्थे जपे
॥१॥ विनियोगः ॥ मण्डलस्थं सुखासीनं भगवन्तं महेश्वरम् ॥ समुपागम्य चरणे पार्वती
पर्य्यपृच्छत ॥ देव्युवाच ॥ धारणी परमा विद्या प्रत्यंगिरा महोत्तमा ॥ नरनारीहि
तार्थाय बालानां रक्षणाय च ॥ २ ॥ राज्ञां मण्डलिकानां च दीनानां च महेश्वर ॥
विदुषां च द्विजातीनां विशेषात्सर्वसाधिनीम् ॥ ३ ॥ महाभयेषु सर्वेषु विद्युदग्नि ॥१॥
भयेषु च ॥ व्याघ्रदंष्ट्रिकराघाते नदीनद समुद्रके ॥ ४ ॥ अभिचारेषु सर्वेषु राजे ॥राम:॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राजभयेषु च ॥ सौभाग्यजननी देवी नृणां चैव वशंकरि ॥ ५ ॥ पठिता पा
ठिता देवी सर्वसिद्धिकरी सदा ॥ यस्याग्रस्था महाविद्या प्रत्यंगिरा शि
वोदिता ॥ ६ ॥ सर्वार्थसिद्धिदा तस्य विधेयं परमात्मना ॥ श्रीमतां घोर
रूपेण भाविना घोररूपिणी ॥ ७ ॥ प्रत्यंगिरा सदा प्रोक्ता पनिहःप्पात्र
संशयः ॥ हरिचंदनमिश्रेण रोचनाकुंकुमेन च ॥ ८ ॥ लिखित्वा भूर्जपत्रे
वा धारयित्वा सदा नृपे ॥ तां विद्यां भो सुरश्रेष्ठ कथयस्व मयि प्रभो ॥ ९ ॥
श्रीभैरव उवाच ॥ ॐ श्रीं श्रीं क्रीं ह्रीं फट् स्वाहा ॥ साधु साधु महाभागे

CC-0. In Public Domain. Digitization by eGangotri

जन्तूनां हितकारिणी ॥ लक्षचनाम्युगरि प्रकथयामि न संशयः ॥ १० ॥ धर्म्यं
॥प्र॰ स्तो॥ गिरमहाविद्यासर्वदुःखविनाशिनी ॥ सर्वार्थसिद्धिदं सर्वदुष्टानां सर्वपापप्रमो
॥२॥ चिनी ॥ ११ ॥ स्त्रीबालवृद्धभक्तानां च जन्तूनां हितकारिणी ॥ सौभाग्यज
ननी देवी बलपुष्टिकरी तथा ॥ १२ ॥ चतुःपथे सुगेहे सुवने सुपवने सुच
॥ श्मशाने दुर्गमे घोरे संग्रामे शत्रुसंकटे ॥ १२ ॥ राजद्वारे च दुर्भिक्षमहा
भयउपस्थिते ॥ पठितापाठिता देवी सर्वसिद्धिकरी स्मृता ॥ १४ ॥ विद्या ॥२॥
नामुत्तमा विद्या वाचिता धारिता नरैः ॥ शिविना च करे कंठे वा लेखि ॥राम॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रभिधारयेत् ॥ १५ ॥ समुच्चनेमहाघोरैर्म्लेच्छपानैर्दुरासदैः ॥ पसंग्रागत्याम
हाविद्याप्रत्यंगिरामहोत्तमा ॥ १६ ॥ सर्वार्थसिद्धिदानित्यांविद्येयंपरमात्मना
श्रमितां घोररूपेणभाषिताघोररूपिणी ॥ १७ ॥ प्रत्यंगिरामदाश्रेकोपिपूं
हृत्पापसंशयः ॥ हरिचंदनमिश्रेणरोचनाकुंकुमेनच ॥ १८ ॥ लिखित्वा
भूर्जपत्रेवाधारितव्यासदानृपैः ॥ पुष्पैर्धूपैर्विचित्रैश्चबलिमहारिभज
नैः ॥ १९ ॥ पूजयित्वायथान्यायंसप्तकुंभेनवेष्टयेत् ॥ यइमंधारयेन्मंत्रंति
शिवंतंरिपुनाशनम् ॥ २० ॥ विलयंयांतिरिपवःप्रत्यंगिराभिधारणात् ॥

॥प्र. तो.॥ यथं यस्य शानिहस्तेन यथं वदनि जिह्वया ॥२१॥ अस्मतेन दुर्देवेन स्पनापन्न तु:
॥३॥ कथंचन ॥ त्रिपुरस्थ्नमयादग्धस्मादिग्धांचविग्रता ॥२२॥ निर्जितास्त्वासुराः
सर्वेदेवैर्विघाप्रभावतः ॥ गोलकं संप्रवक्ष्यामि भेदवज्रमिव धारणात् ॥ कांता
मदनकंचैवकुंकुमं रोचनातथा ॥ अगरुंचवसारिहंसिद्धार्थमालतीतथा ॥
२४ ॥ एतद्द्रव्यगणंभद्रेगोलंगर्भेणधारयेत् ॥ धारयेत्संततंमांपवित्रंसाधकोत्तमं
जविसदा ॥२५॥ अमुनालंप्रवक्ष्यामिप्रत्यंगिरांसुभाषितान् ॥ दिव्यमेक ॥३॥
पदेश्चिवैःसुरवोपापैःशुभप्रदैः ॥२६॥ पठे दुस्त्वाविधानेनमंमेरणंजप्रकीर्ति ॥राम:॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम्॥ अथातो मंत्रपादानि संप्रवक्ष्यामि यत्नतः॥ २३॥ नप्रथा॥ ॐ नमः सहस्र
रश्म्यैर्यलक्षणाय चन्द्रनादिरूपाय पुरुषोत्तमाय चण्डरोहिताय षडंदराय महाक्ष
क्ष्मायमहाव्यापिने महेश्वराय जगतांशान्तिकारिणे संस्थानाय। सर्वभूतव्या
पिने। महामोहासिधाराय। ॐ महाप्रभवं दर्शय २ ॐ हिरि २ ॐ मिलि २ ॐ हु
रि २ ॐ विघु ञ्जिहि २ ॐ ज्वल २ ॐ प्रज्वल २ ॐ वध २ ॐ मथ २ ॐ प्रमथ २ ॐ
प्रघसय २॥ ॐ पिब २ ॐ नाशय २ ॐ वद २ ॐ ज्वल २ ॐ प्रज्वल २ ॐ विद्रावय २
ॐ वध २ ॐ विद्रावय २॥ ॐ छिंदि २ ॐ भिंदि २ ॐ कर्णाय २ ॐ [illegible] भक्षय २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ॐ ग्रासय २ ॐ भ्रामय २ ॐ ज्वल २ ॐ चूर्णय २ ॐ दह २ ॐ भंजय ॥ ॐ गंजर २ ॐ
॥प्र. स्तो॥ स्फोटय २ ॐ चूर्णय २ ॐ उन्मादय २ ॐ मर्दय २ ॐ मोक्षय २ ॐ छिंदि २ ॥
॥४॥ ॐ भिंदि २ ॐ ग्रासय २ ॐ मोहय २ ॐ उन्मूलय २ ॐ संकोचय २ ॐ आवेश
य २ ॥ ॐ आघ्राणस्य गुह्यायोगपुरुषं रक्ष २ ॐ मां मां धारकं सपरिवारं रक्ष
२ ॥ महाभयोपद्रवोपसर्गेभ्यो महद्भ्यो घोरघातिके संवर्त्तके विघ्नकुंभेकप
र्दिने दिव्यकनकाभोरुहविकचमालाधारिणि शिवकंचुकव्याघ्राजिनधा
रिणि परमेश्वरप्रिये ॥ ॐ छिंदि २ ॐ भिंदि २ ॐ विद्रावय २ ॐ देवपिशाचना ॥४॥
॥राम:॥
10

CC-0. In Public Domain. Digitization by eGangotri

गासुरगरुडकिन्नरविद्याधरगणगंधर्वराक्षसलोकपालांश्च आलोकय २ स्तंभ
य २ यममधारकस्य शत्रूस्तान्श्रिभितंय २ येचमांविद्याकर्मकुर्वन्तितेषांविद्यांस्तं
भय २॥ कीलय २ छेदय २ शोषय २ विशोषय २ चूर्णय २ विध्वंसय २ येमहातेजसे
२ ॐ महाशत्रूणां हस्तौ स्तंभय २ ममशत्रूणां पादौ स्तंभय २ ममशत्रूणां नेत्रं स्तंभ
य २ ममशत्रूणां मुखं स्तंभय २ ममशत्रूणां श्रोत्रं स्तंभय २ ममशत्रूणां त्वचं स्तं
भय २ ममशत्रूणां सर्वमर्माणि स्तंभय २ स्थानं कीलय २ नाभिं कीलय २ मण्ड
लं कीलय २ देशं कीलय २ सर्वसिद्धि महाभागि ममधारकस्य सपरिवारस्य शत्रूं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥प्र. ला.॥ त्रिकुरु २ ॐ ॐ वं २ हूँ २ फट् स्वाहा। ॐ हंहंहं हं हं ॐ चंचं चं चं चं ॐ रंरंरंरं रं
ॐ लंलंलं लं लं ॐ वंवंवंवंवं ॐ ह्रीँ फट् स्वाहा। ॐ प्रत्यङ्गिरे महाविघ्ने मम धा
॥२॥ रकस्य सपरिवारस्य रक्षां कुरु २ कुरु २ ॐ घः घः ॐ ॐ ॐ ह्रीँ फट् स्वाहा। ॐ मम
धारकस्य सपरिवारस्य शत्रून् हन २ धम २ सर्वदुष्टान् ग्रस ग्रस ॐ ॐ ॐ ॐ ॐ दद्रुक
रालिनि मम मंत्रविषसंघात् सर्वोपद्रवादिकं येन कृतं कारापितं ध्यातं वा तान् स
र्वान् दह २। प्रत्यङ्गिरे रक्ष २ ॐ स्वामी धारकस्य सपरिवारं रक्ष २ ॐ ॐ स्फ्रों २ क्षौँ
फट् स्वाहा। ऐं ह्रीँ श्रीँ प्रत्यङ्गिरे मम शिरो रक्ष रक्ष स्वाहा। ॐ ह्रीँ श्रीँ माहेश्वरि मि ॥५॥ ॥ रामः॥

CC-0. In Public Domain. Digitization by eGangotri

मनेत्रे रक्ष रक्ष स्वाहा ॥ ॐ ऐं ह्रीं श्रीं कौमारि मम वक्त्रं रक्ष रक्ष स्वाहा ॥ ॐ ऐं ह्रीं श्रीं
वैष्णवी मम कण्ठं रक्ष रक्ष स्वाहा ॥ ॐ ऐं श्रीं नारसिंही मम बाहू रक्ष रक्ष स्वाहा
॥ ॐ ऐं ह्रीं श्रीं वाराही मम हृदयं रक्ष रक्ष स्वाहा ॥ ॐ ऐं ह्रीं श्रीं ऐं इंद्राणि मम नाभिं
रक्ष रक्ष स्वाहा ॥ ॐ ऐं ह्रीं श्रीं चण्डिके मम तलं रक्ष रक्ष स्वाहा ॥ ॐ ऐं ह्रीं श्रीं चा
मुण्डे मम जंघे रक्ष रक्ष स्वाहा ॥ ॐ ऐं ह्रीं श्रीं वसुंधरे मम पादौ रक्ष रक्ष स्वाहा ॥
ॐ ऐं ह्रीं श्रीं ह्रूं ह्रूं ख्फ्रें स्फ्रूं हूं फ्रूं प्रत्यंगिरे मम सर्वशरीरं रक्ष रक्ष स्वाहा ॥ ॐ ऐं ह्रीं
श्रीं सर्वत्र महालक्ष्मि मम रक्ष रक्ष स्वाहा ॥ ॐ ऐं ह्रीं श्रीं लं भिनी रख्फ्रें २ मम शत्रू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ प्र लो ॥ क्षोभय २ ॐ ऐँ ह्रीँ श्रीँ विद्राविणी स्फ्रें २ मम शत्रून् विद्रावय २ ॐ ऐँ ह्रीँ श्रीँ रौद्रि
णी स्फ्रेँ २ मम शत्रून् संतापय २ ॐ ऐँ ह्रीँ श्रीँ संहारिणी स्फ्रें २ मम शत्रून् संहारय २ ॥
॥ ६ ॥ ॐ ऐँ ह्रीँ श्रीँ ॥ मोहिनी क्षामरी रौद्रि नाथा संहारिणी तिच ॥ स्तंभिनी द्राविणी
चैव क्षोभिणी मारिणी तथा ॥ शाल्कः यः क्रमयोगेन शत्रुपक्षे नियोजिता ॥ धारि
तासाधकेन्द्रेण सर्वशत्रुविनाशिकाः ॥ य इमां धारयेद्विद्यां त्रिसंध्यं वा पियः पठेन्नरः
सोपि दुःखान्तको देवी रिपुं हन्यान्न संशयः ॥ सर्वतो धारयेद्विद्यां महाभय विपत्तिषु ॥ ६ ॥
॥ महाभयेषु सर्वेषु न भयं विद्यते क्वचित् ॥ इति श्रीमत्कुब्जिकातन्त्रे जेचरण ग्रहदस्ल ॥ राम: ॥

क्षेत्रपालस्तोत्रं समाप्तम्

52

CC-0. In Public Domain. Digitization by eGangotri

[redacted]

अंगारकपूजाविधिः

दे. नं. १६८४३

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ कं ॥ श्रीगणेशाय नमः ॥ प्रथममासने उपविश्य ॥ भूतादिकानुत्सार्य । मूलेन
॥ १ ॥ त्रिराचम्य ॥ ॐ ह्रीं यां कल्पयन्ति नोरयः क्रूरां कृत्यां वधूमिव ॥ तां ब्रह्मणा अ
प निर्णुद्म प्रत्यक्कर्तारमृच्छतु ह्रीं ॐ ॥ इति मंत्रेण प्राणायामत्रयं कृत्वा । हस्ते
जलं गृहीत्वा । ॐ अस्य श्रीप्रत्यंगिरामंत्रस्य ब्रह्मा ऋषिरनुष्टुप् छंदो देवी प्रत्यं 13
गिरा देवता ॐ बीजं ह्रीं शक्तिः कृत्यानाशे विनियोगः ॥ इत्युत्सृजेत् । शिर
सि ब्रह्मणे ऋषये नमः मुखे अनुष्टुप् छंदसे नमः ॥ हृदये प्रत्यंगिरायै देव ॥ ष्मः ॥
तायै नमः ॥ गुह्ये ॥ ॐ बीजाय नमः ॥ पादयोः ॥ ॐ शक्तये नमः ॥ ॐ यां कल्पयन्ति ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

नोरयो ह्रां अङ्गुष्ठाभ्यां नमः॥ ॐ क्रूरां कृत्यां ह्रीं तर्ज्जनीभ्यान्नमः॥ ॐ वधूमिव ह्रूं म
ध्यमाभ्यान्नमः॥ ॐ तां ब्रह्मणा ह्रैं अनामिकाभ्यां नमः॥ ॐ अप निर्णक घ्न ह्रौं कनि
ष्ठिकाभ्यान्नमः॥ ॐ प्रत्यक्कर्त्तारमृच्छतु ह्रः करतलकरपृष्ठाभ्यां नमः॥ ॐ यां कल्पयं
ति नोरयो ह्रां हृदयाय नमः॥ ॐ क्रूरां कृत्यां ह्रीं शिरसे स्वाहा॥ ॐ वधूमिव ह्रूं शिखा
यै वषट्॥ ॐ तां ब्रह्मणा ह्रैं कवचाय हुं॥ ॐ अप निर्णक घ्न ह्रौं नेत्रत्रयाय वौषट्
ॐ प्रत्यक्कर्त्तारमृच्छतु ह्रः अस्त्राय फट्॥ ॐ ह्रां यां ह्रां ॐ शिरसि १ ॐ ह्रीं कल्पयन्ति
ह्रीं ॐ भ्रूमध्ये २ ॐ ह्रूं नः ह्रूं ॐ मुखे ३ ॐ ह्रैं अरयः ह्रैं ॐ कण्ठे ४ ॐ ह्रौं क्रूरा ह्रौं ॐ दक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥कं॥ णाबाहौ ५ ॐ ह्रीं कन्यां ह्रीं ॐ वामबाहौ ६ ॐ ह्रीं वध्रूमहीं ॐ हृदि ७ ॐ ह्रीं श्व
॥२॥ ह्रीं ॐ नाभौ ८॥ ॐ ह्रीं तां ह्रीं ॐ दक्षोरौ ९ ॐ ह्रीं ब्रुमरणां ह्रीं ॐ वामोरौ १० ॐ
अपनिरोध ह्रीं ॐ दक्षजानुनि ११ ॐ ह्रीं प्रत्यक्ह्रीं ॐ वामजानुनि १२
ॐ ह्रीं कर्त्तारम् ह्रीं ॐ दक्षपादे १३ ॐ ह्रीं तत्त्वतु ह्रीं ॐ वामपादे १४ ऐवं
मृत्याञ्जयाद्याद्विर्वर्णानंन्यासं द्विः एतैस्त्रिः कार्याः मूलेन व्यापायेद्ध्यान्॥
ध्यानम्॥ आशांबरामुक्तकचाघनच्छविर्ध्येयासचर्मासिकरा हि मृष ॥मृ॥
णा॥ हृत्स्तोग्नवक्त्रा घनासिताहिताच व्याघ्रत्वपंगिरा शंकरतेजसेरिता ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१॥ इति ध्यात्वा नमेत्॥ यथाशक्तिजपं कुर्यात्॥ जपांते पुनर्ऋष्यादिविन्यासेत्
तदनंतरं जपं समर्पयेत्॥ अनेन मंत्रेण॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं
सिद्धिर्भवतु मे देवी। त्वत्प्रसादात्सुरेश्वरि॥ १॥ ततः स्तोत्रादिकं पठेत्॥ पुरश्चरणं तु लक्ष
जपं। अपामार्गसमिधा। गायो। घिउ होमं द्रव्य॥ पूजने। जयादि पीठ। अंग। लोकेश्वर।
आयुध। पूजनयंत्रम्॥ अष्टपत्रम्॥ भूपुरम्॥ मंडूकादीपरतत्वान्तः पीठदेवताभ्यो
नमः। जयायै नमः॥ विजयायै नमः॥ अजितायै नमः॥ अपराजितायै नमः॥ नि
त्यायै नमः॥ विलासिन्यै नमः॥ दोग्ध्र्यै नमः॥ अघोरायै नमः॥ मंगलायै नमः॥ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ कं ॥
॥ ३ ॥

हृदयायनमः॥ शिरसेस्वाहा॥ शिखायैवषट्॥ कवचायहुं॥ नेत्रत्रयायवौषट्॥ अस्त्रायफट्॥ इन्द्रायनमः॥ इतिकंडिकायाः न्यासपूजाविधिसमाप्तम्॥
॥ श्री॥ शुभमस्तु॥

॥ एमः ॥
॥ २ ॥

15

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पु. नं. १६८४२

मण्डपपूजाविधि

मूल्य ६।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म·पू श्रीगणेशायनमः॥मण्डपपूजाविधिः॥ प्रथमं मण्डप पश्चिम द्वारि दीपक
लशगणेशपूजांविधायसपरिवारोयजमानः पूर्णकलशहस्तो
१ भद्रङ्कर्णेभिरितिमन्त्रंपठन्मण्डपंत्रिपदक्षिणीकृत्य पश्चिमद्वारेण प्रवि रामः
शेत्॥भद्रङ्कर्णेभिःशृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः॥स्थिरैरङ्गै
स्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितंयदायुः॥ततोवक्ष्यमाणम
न्त्रेण गौरसर्षपान्विकीर्य, भूतादीनपसारयेत्॥ॐ यदत्र संस्थि १
तं भूतं स्थानमाश्रित्य सर्वदा॥स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गच्छन्तु ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम् ॥ सर्वेषाम
विरोधेन ब्रह्मकर्मसमारभे ॥ इति । ततः ॐ शुचिवो हव्येति ऋच्चये
ण, आपोहिष्ठादिभिर्मन्त्रैश्च पञ्चगव्येन भूमिं सम्प्रोक्ष्य, शुचीवो
हव्यामरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः । ऋतेन सत्यमृ
तसाप आयन् शुचिजन्मानः शुचयः पावकाः ॥ अग्निः शुचिव्रततम
मः शुचिर्विप्रः शुचिः कविः शुचिरोचत आहुतः ॥ उदग्ने शुचयस्त
व शुक्राभ्राजन्त ईरते । तवज्योतींष्यर्चयः ॥ शुचिः पावक उच्यते सो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म·पू. सुतस्यमध्वः ।। देवावीरघशंसहा ।। आपोहिष्ठामयोभुवस्तानऽऊर्जेद
धातन । महेरणायचक्षसे ।। योवः शिवतमोरसस्तस्यभाजयतेहनः
२ ।।उशतीरिवमातरः ।। तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ ।। रामः
आपोजनयथाचनः ।। इति । ततः स्वस्त्ययनन्तार्क्ष्यमितिमन्त्रद्वयं
जपेत् ।।ॐ स्वस्त्ययनन्तार्क्ष्यमरिष्टनेमिंमहद्भूतं वायसन्देवतानाम्
।।असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवारुहेम ।। अंहोमुच २
माङ्गिरसङ्गयञ्च स्वस्त्यात्रेयं मनसा च तार्क्ष्यं प्रयतपाणिः शरणं प्र प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये स्वस्ति संवादे स्वभयन्नोऽ अस्तु ॥ इति ॥ ततो वाद्यघोष
पुरःसरं आचार्यैः पूर्वद्वारे ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्वि
जम् ॥ होतारं रत्नधातमम् ॥ इति मंत्रं पठित्वा ॐ सुदृढ तोरण इ
हागच्छेह तिष्ठेत्यावाह्य पाद्यमर्घ्यमाचमनीयं स्नानीयं गन्धं,
पुष्पं धूपं दीपं नैवेद्यं सुदृढतोरणाय नमः इति संपूज्य, तोरण पा
र्श्वयो राहो इहागच्छेह तिष्ठेत्यावाह्य, गुरो इहागच्छेह तिष्ठे
त्यावाह्य तौ पूजयित्वा, द्वारे दध्यक्षतवस्त्रमाल्यादिभिर्युतमव्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म. पू. शां कलशं धान्योपरि स्थापयित्वा, तत्र ध्रुवमावाह्य पाद्यादि नैवेद्या
न्तं निवेद्य दक्षिणद्वारे ॐ इषेत्वोर्ज्जेत्वा वायवस्थ देवोवः सविताप्रा
३ र्पयतु श्रेष्ठतमाय कर्मणाऽ आप्यायध्वमघ्न्याऽ इन्द्राय भागं प्रजाव रामः
तीरनमीवाऽ अयक्ष्मा मावस्तेन ईशत माघसंसो ध्रुवा अस्मिन् गो
पतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ इति मन्त्रेण ॐ सुभद्रतोर
णं इहागच्छेह तिष्ठेत्यावाह्य पूजयित्वा, ततः सूर्याङ्गारकावावाह्य पू ३
जयित्वा, द्वारे कलशं संस्थाप्य तत्र धरणमावाह्य पूजयेत् ॥ ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चिमद्वारे ॐ अग्न ऽआयाहि वीतये गृणानो हव्यदातये ॥ निहोता
यत्स्य वर्हिषि ॥ इति मन्त्रेण सुकर्मतोरण इहागच्छ इहतिष्ठेत्या
वाह्य संपूज्य, पार्श्वयोः शुक्रबुधावावाहनपूर्वकं पूजयित्वा, द्वारेक
लशं संस्थाप्य तत्र वाक्पतिं पूजयेत् ॥ तत्र उत्तरद्वारे ॐ शन्नोदेवी
रभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ इति मन्त्रे
ण सुहोत्रतोरण इहागच्छ इहतिष्ठ त्यावाह्य संपूज्य, पार्श्वयो
: सोमकेतू चावाह्य संपूज्य, द्वारे कलशं संस्थाप्य, तत्र विघ्नेशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म·पू· पूजयेत् ॥इति तोरण पूजां निर्वर्त्य, पूर्वद्वारपार्श्वयोरव्रणकलशद्व
यं पूर्ववत्संस्थाप्य, वामे ऐरावतं दिग्गजमावाह्य संपूज्य, दक्षिण
४ कलशे इन्द्रं ध्यात्वा ॐ त्रातारमिन्द्रमवितारमिन्द्रᳬ हवे हवे रामः
सुहवᳬ शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रᳬ स्वस्ति नो म
घवा धात्विन्द्रः॥ ॐ एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रध
रामरेश। संवीज्यमानोऽप्सरसां गणेन रक्षाऽध्वरं भो भगवन्नमस्ते ४
भो इन्द्र इहागच्छेह तिष्ठेत्यावाह्य ॐ आशुः शिशानो वृषभो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥ संक्रन्दनो निमिषऽ एकवीरः
शतंठ॰ सेनाऽ अजयत्साकमिन्द्रः, इतिमन्त्रेण पीतां पताकां ध्वजञ्चो
च्छ्रित्य ॐ त्रातारमिन्द्रमिति मन्त्रेण पाद्यादि नैवेद्यान्तां पूजां
निर्वर्त्य, इन्द्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः ॥ शतयज्ञाधिको
देवस्तस्मै नित्यं नमो नमः ॥ इति नत्वा इन्द्राय साङ्गाय सायुधाय
सवाहनाय शचीसहितायेमं दध्यक्षतबलिं समर्पयामि इतिबलिं द
त्वा, किञ्चिन्मार्जनं कृत्वा चामेत् ॥ आग्नेयां कलशद्वयं संस्थाप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म·पू· एकस्मिन्पुण्डरीकं दिग्गजं पूजयित्वा अन्यस्मिन् अग्निं ध्या
त्वा, एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभितोऽभिजुष्ट ।। तेजोव
५ ताल्लोकगणेन सार्धं ममाध्वरं पाहि कवे नमस्ते ।। भो अग्ने इह रामः
गच्छेह तिष्ठेत्यावाह्य ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे ।।
देवाँ २ आसादयादिह ।। इति पठित्वा रक्तपताकं ध्वजमुच्छ्रित्य
अग्निं संपूज्य, आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः ।। ५
धूमकेतू रजोध्यक्षस्तस्मै नित्यं नमो नमः ।। इति नत्वा सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साङ्गाय सायुधाय सवाहनाय सस्वाहाशक्तिकायेति पूर्ववद्‌ ·
लिं दत्वा मार्जनाचमने कुर्यात् ॥ ततो दक्षिणद्वारपार्श्वयो
:कलशद्वयं धृत्वा वामकलशे वामनादिगजमावाह्य, संपूज्य
दक्षिणे यमं ध्यात्वा, एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चि
त धर्ममूर्त्ते ॥शुभाशुभानन्दपुजामधीश शिवाय नः पाहि मखं
नमस्ते ॥ भोयम इहागच्छेह तिष्ठ इत्यावाह्य ॐ आयङ्गौः पृ
श्णिरक्रमीदसदन्मातरं पुरः । पितरञ्च प्रयंन्स्वः ॥ इति सकृ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म·पू· ज्ञापनार्थं दक्षजमुच्छ्रित्य ॐ यमाय सोमं सुनुत यमाय जुहुता हविः।
यमं ह यज्ञो गच्छत्यग्निदूतोऽअरङ्कृतः ॥ इति यमं संपूज्य, महिष
६ हिषमारूढं दण्डहस्तं महाबलम् ॥ आवाहयामि यज्ञेऽस्मिन् पूजेयं राम:
प्रतिगृह्यताम् ॥ इति नत्वा साङ्गाय इन्द्राशक्तिसहिताय इति पू
र्ववद्बलिं दत्वा मार्जनाचमने कुर्यात् ॥ ततो नैर्ऋत्यकोणे कल
शद्वयं संस्थाप्य कुमुदं दिग्गजं संपूज्य निर्ऋतिं ध्यात्वा, एह्येहि ६
रक्षोगणनायकस्त्वं विशालवेतालपिशाचसंघैः ॥ ममाध्वरं पा

ह्वि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते ॥इत्यावाह्य, मोषूण
ऽइन्द्रात्र पृत्सु देवैरस्ति हि ष्माते शुष्मिन्नवयाः। महश्चिद्यस्य मीढुषो
य व्याहविष्मतो मरुतो वन्दते गीः ॥इतिमन्त्रेण नीलां पताकां ध्व
जश्चोच्छ्रित्य, निर्ऋतिं पूजयित्वा, निर्ऋतिं खड्गहस्तं च सर्वलोकै
कपालकम् ॥आवाहयामि यज्ञे स्मिन् पूजेयं प्रतिगृह्यताम् ॥इतिन
त्वा माङ्गाय सकान्तिकाशक्तिकाय निर्ऋतये इममित्यादि पूर्व्वव
द्गन्धक्षतवलिं दत्वा मार्जनाचमने कुर्यात् ॥ ततः पश्चिमद्वार पार्श्वे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म·पू· योः कुम्भद्वयं संस्थाप्य वामकुम्भे अञ्जनादिध्वजं संपूज्य, दक्षिणकुम्भे
ॐ अग्नऽआयाहिवीतये गृणानो हव्यदातये निहोतासत्सि बर्हिषि
७ ॥इति पठित्वा वरुणं ध्यात्वा, एह्येहि यादोगणवारिधीनां गणेन १५:
पर्जन्यसहाप्सरोभिः ॥ विद्याधरेन्द्रामरगीयमानः पाहि त्वमस्मान्
भगवन्नमस्ते ॥ भो वरुण इहागच्छेह तिष्ठेत्यावाह्य, इमम्मे व
रुणश्रुधी हवमद्या च मृडय ॥ त्वामवस्युराचके ॥ श्वेतां पताकां ७
ध्वजं चोच्छ्रित्य, ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते य

CC-0. In Public Domain. Digitization by eGangotri

यजमानोहविर्भिः ॥ ओं इमा नो वरुणो ह्वयोरुरुश ऽ० समान
ऽ आयुः प्रमोषीः ॥ इति मन्त्रेण वरुणं पूजयित्वा, पाशहस्तं
च वरुणं मर्णसां पतिमीश्वरम् ॥ आवाहयामि यज्ञेऽस्मि
न् वरुणाय नमोनमः ॥ इति ध्यात्वा नत्वा, सा स्नायेत्यादि
पद्मीनी शक्तिकाय वलिं दत्वा मार्जनाचमने कुर्यात् ॥ त
तो वायव्यकोणे कुम्भद्वयं संस्थाप्य तत्र पुष्पहस्तं ध्विग
जं संपूज्य वायुं ध्यात्वा, एह्येहि यज्ञे मम रक्षणाय मृगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म.पू. षिरूढः सह सिद्धसंघैः ॥ प्राणाधिपः कालकवेः सहाय गृह्ण
ण पूजां भगवन्नमस्ते ॥ भो वायो इहागच्छेह तिष्ठ त्पाव
८ स्व, ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि ॥ नियु रामः
त्वान्त्सोमपीतये ॥ इति धूम्रां पताकां ध्वज ग्धोच्छ्रित्य
॥ वायुं संपूज्य, वायुमाकाशगं चैव पवनं वेगवद्गतिम् ॥ आ
वाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यताम् ॥ अनाकारो महो ८
जाश्च यश्चादृष्टगतिर्दिवि । नमस्ते पूज्याय जगतो वायवे सत

CC-0. In Public Domain. Digitization by eGangotri

तं नमः ।। इति नत्वा, साज्ञायेत्पादि मोहिनी शक्तिकाय वा
यवे वर्त्तिं दत्त्वा मार्ज्जनाचमने कुर्यात् ।। तत्र उत्तरे पार्श्व
योः कुम्भद्वयं निधाय वामे सोव भौमादि गाज्ज मावाह्य
संपूज्य, दक्षिणे ॐ शन्नोदेवीरभिष्टय ऽ आपो भवन्तु पीत
ये ।। शंयोरभिस्रवन्तु नः ।। इति. सोमं ध्यात्वा एह्येहि
यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्धम् ।। सर्वौ
षधिभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ।। सोमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म·पू· प्र इहागच्छेह तिष्ठेत्यावाह्य · आप्यायस्व समेतु ते वि-
श्वतः सोम वृष्ण्यम् ॥ भवावाजस्य सङ्गथे ॥ इतिहरितां प
९ ताकां ध्वजं चोच्छ्रित्य ॐ सोमोधेनुं ठं॰ सोमोऽ अर्वन्तमा रामः
शुं ठं॰ सोमोवीरं कर्मण्यन्ददाति ॥ सादन्यं विदथ्यं सभेयं पितृश्रवणं योददा
शमस्मै ॥ ॐ सोमाय नमः इतिसोमं संपूज्य, सर्वनक्षत्र मध्येतु
सोमो राजा व्यवस्थितः ॥ तस्मै सोमाय देवाय नक्षत्रपतये नमः ॥ ९
इति नत्वा आप्यायस्वेत्यादि चित्रिराशी पतये सोमाय चित्रौदनबलिं द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा मार्जनाचमने कुर्यात् ॥ तत्र ईशाने कलशं संस्थाप्य सुप्रतीकं
दिग्गजं संपूज्य, ईशानं ध्यात्वा, एह्येहि विश्वेश्वर नस्त्रिशूलक
पालखट्वाङ्गधरेण सार्द्धम् ॥ लोके च यज्ञेश्वर यज्ञसिद्ध्यै गृ
हाण पूजां भगवन्नमस्ते ॥ भो ईशाने ह्यागच्छेह तिष्ठ त्वावाह्य,
ॐ अभित्वादेवसवितरीशानं वार्याणाम् ॥ सदावन्भागमीमहे ॥ इ
ति मन्त्रं पठित्वा श्वेतां पताकां ध्वजञ्चोच्छित्य, ईशानं संपू
ज्य, वृषस्कन्धसमारूढं शूलहस्तं त्रिलोचनम् ॥ आवाहयामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म.पू. यज्ञेऽस्मिन् पूजेयं शनिगृह्यतनाम् ॥ सर्वाधिपो महादेव ईशानः शुक्ल
ईश्वरः ॥ शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नमः ॥ इति नत्वा
१० साङ्गाये त्यादि गौरीशक्तिकाय ईशानाय बलिं दत्वा मार्जनाचमने कु- राम:
र्यात् ॥ निर्ऋतिवरुणयोर्मध्ये कलशं संस्थाप्य अनन्तं ध्या-
त्वा, एह्येहि पाताल धरामरेन्द्र नागाङ्गनाकिन्नरगीयमानः ॥ रक्षो-
मरेन्द्रामरलोकसङ्घैरनन्त रक्षाध्वरमस्मदीयम् ॥ भो अनन्तेह १०
गच्छेह तिष्ठेत्यावाह्य रक्तां पताकां ध्वजञ्चोच्छ्रित्य, आय

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋौः पृथ्विरक्रमीदशदन्मातरं पुरः। पितरञ्च प्रपन्नवः ॥ इत्यनन्तं सं
पूज्य, योसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ॥ पुष्पवद्धारयेन्मूर्ध्नि-
तस्मै नित्यं नमो नमः ॥ इति नत्वा साङ्गाये त्यादि लक्ष्मीशक्तिकाया
नन्तायेमं दध्यक्षतवलिं समर्पयामि । ततो मार्जनाचमने कुर्यात् ॥ तत
इन्द्रेशानयो र्मध्ये कुम्भं संस्थाप्य ब्रह्माणं ध्यात्वा, एह्येहि सर्ववि
पत्ते सुरेन्द्रलोकेन सार्धं पितृदेवताभिः ॥ सर्वस्य धातारमितप्रभावो
विशाध्वरं नः सततं शिवाय ॥ ओं ब्रह्मन्निहागच्छेह तिष्ठेत्यावाह्य, ॐ:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म·पू· ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः सबुध्न्याऽउपमा
ऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ इति रक्तां पताकां ध्व राम:
११ जञ्चोच्छ्रित्य ब्रह्माणं संपूज्य, पद्मयोनिश्चतुर्मूर्ति वेदवासः पि ११
तामहः ॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥ इति नत्वा
साङ्गायेत्यादि सावित्री शक्तिकाय ब्रह्मणे इमं बलिं समर्पयामि । इति मार्ज
नाचमने कुर्यात् ॥ ततो मण्डपमध्ये ॐ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदि
त्यानां मरुतां ॐ शर्द्ध ऽउग्रम् । महामनसां भुवनच्यवानां घोषो देवानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयनामुदस्थान् ॥ इतिमन्त्रेण शुक्लं किंकिणीयुतं महाध्वजं समु
च्छ्रित्य, तत्र ब्रह्मजज्ञान मितिमन्त्रेण ब्रह्माणं संपूज्य, मण्डपषोड
शस्तम्भेषु प्रत्येकं पूजयेत् अथ वेदिकाग्नेयकोणस्तम्भे वसुधामावाह्य,
ॐ वसुधायै नमः इति पञ्चोपचारैः पूजयेत् ॥१॥ एवं क्रमेण नैर्ऋ
त्यस्तम्भे भद्राम् २। वायव्ये ऽदितिम् ३, ईशाने नन्दाम् ४। संपूज्य,
बाह्यस्तम्भेषु आग्नेयकोणमारभ्य भूतिम् १, सरस्वतीम् २, पूर्वस
न्ध्याम् ३, मध्यमसन्ध्याम् ४, पश्चिमसन्ध्याम् ५, गायत्रीम् ६,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म.पू. वृहस्पतिम् ८, अदितिम् ९, विनताम् १०, पूर्णिमाम् ११, सिनीवा
ल्लीम् १२, प्रत्येकं संपूज्य, वंशेषु किन्नरान्, पृष्ठे पन्नगान्, शाखा
१२ वन्धनादिषु सर्वदेवान् संपूज्य, द्वार पूजां कुर्यात्, पूर्व द्वार मध्ये ॐ द्वा रमः
रश्रियै नमः। ऊर्ध्वम् ऊर्ध्वदेहल्यै नमः। अधः ॐ अधोदेहल्यै नमः।
द्वारस्तम्भयोः ॐ जयाय नमः। विजयाय नमः। द्वार कलशयोः ॐ
गङ्गायै नमः, यमुनायै नमः। तोरणोपरि इन्द्रवान् भगान् पूजयेत्। अ १२
नेन क्रमेण दक्षिणे द्वारश्रियम् १, ऊर्ध्वदेहलीम् २, अधोदेहलीम् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

०पुण्यशील सुशीलौ ५, गोदाम् ६, कृष्णाम् ७, पूषमित्रवरुणान्
॥एवं पश्चिमद्वारि द्वार० ऊर्द्ध० अधो० नन्द सुनन्दौ रेवां, तापी
म्, अर्यम विवस्वदंशून् ॥उत्तरे द्वा० ऊ० अ० चण्ड प्रचण्डौ, वा
राहीम्, वेणीम्, त्वष्टृ सवितृ विष्णून् पूजयेत् ॥ अथभूतबलि:
॥नमो मण्डपपूर्वस्यां दिशि भूमिमुपलिप्य, त्रैलोक्ये यानि भूतानि
स्थावराणि चराणिच। ब्रह्म विष्णु शिवै: सार्धं रक्षां कुर्वन्तु तानि मे.
॥देवदानव गन्धर्वा यक्ष राक्षस पन्नगा: ॥ऋषयो मनवो गावो देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म.पू. देवमातर एवच ।। सर्वेममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः ।।ब्रह्मा
विष्णुश्च रुद्रश्च लोकपालगणैः सह ।। रक्षन्तु मण्डपं सर्वे घ्नन्तु
१३ रक्षांसि सर्वतः ।। त्रैलोक्यवासिभ्यः स्थावरभूतेभ्यो नमः ।। त्रैलो. रामः
क्यचरभूतेभ्यो नमः ।।ॐ ब्रह्मणे विष्णवे शिवाय देवेभ्यो यक्षे
भ्यः पन्नगेभ्य ऋषिभ्यो मनुष्येभ्यो गोभ्यो देवमातृभ्यो नमः।।
इति पूजयेत् ।। माषभक्तबलिं च दद्यात् ।। १३

CC-0. In Public Domain. Digitization by eGangotri

मधुपर्कः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधु भवानास्तामित्यस्य प्रजापतिऋषिर्यजुर्ब्रह्मा देवता विष्टरार्चने विनियोगः

मधु. १ श्रीगणेशाय नमः॥ ॥अथ मधुपर्कः॥ ॥यजमानः ॐ
साधु भवानास्तामर्चयिष्यामो भवन्त इति ब्रूयात्॥ ॐ अर्चय इ
ति प्रत्युक्ते, अर्चनीयोपवेशनार्थं शुद्धमासनं दत्वा विष्टरमादा-
य ॐ विष्टरो विष्टरो विष्टरः इत्यन्येनोक्ते, यजमानः ॐ विष्ट
रः प्रतिगृह्यताम् इति वदेत्॥ अर्चनीयः ॐ विष्टरं प्रतिगृह्णा
मि इत्यभिधाय विष्टरं गृहीत्वा ॐ वर्ष्मोस्मीत्याथर्वणऋषि
रनुष्टुप्छन्दो विष्टरो देवता नमस्तुतिपूर्वकोपवेशने विनियोगः राम: १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ वर्ष्मोऽस्मि समानाना मुद्यनामिव सूर्यः ॥ इमन्तमभिनिष्ठामि यो
माकश्चाभिधासति ॥ इत्यासने उत्तराग्रं कृत्वा विष्टरोपर्युपविशे
त् ॥ ततः पाद्यं पाद्यं पाद्यं इत्यन्येनोक्ते, यजमानः पाद्यं अ
ञ्जलिनाऽऽदाय ॐ पाद्यं प्रतिगृह्यतामिति वदेत् ॥ अर्चनीयः
ॐ पाद्यं प्रतिगृह्णामि इत्यभिधाय यजमानहस्तात्पाद्यमादाय
ॐ विराजो दोहोसीति प्रजापतिऋषिरापो देवता यजुः पादप्रक्षा
लने विनियोगः ॥ ॐ विराजो दोहोसि विराजो दोहमसीय ॥ मयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधु
२

पाद्यांये विराजो दोहः ॥ इति दक्षिणपादं प्रक्षालयेत् ॥ ततः पुनः
पाद्यं पाद्यं पाद्यं इत्यन्येनोक्ते, यजमानः पाद्यं अञ्जलिनाऽऽदा
य ॐ पाद्यं प्रतिगृह्यतामू इति वदेत् ॥ अर्चनीयः ॐ पाद्यं प्रति
गृह्णामि इत्यभिधाय यजमानहस्तात्पाद्यमादाय) ॐ विराजो
दोहोसीति प्रजापतिऋषिरापो देवता यजुः पादप्रक्षालने विनि
योगः ॥ ॐ विराजो दोहोसि विराजो दोहमसीय ॥ मयि पाद्यांये
विराजो दोहः ॥ इति वामपादमपि प्रक्षालयेत् ॥ ततो, ॐ विष्टरो
विष्टरान्तरं गृहीत्वा

राम:
२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः ॥ इमन्तमभितिष्ठामि यो मा कश्चाभिदासति.

विष्टरो विष्टरः इत्यन्येनोक्ते, यजमानो विष्टरमादाय ॐ विष्टरः
प्रतिगृह्यताम् इति वदेत् ॥ अर्चनीयः ॐ विष्टरं प्रतिगृह्णामि इ-
त्यभिधाय यजमानहस्ताद्विष्टरमादाय प्रक्षालितपादयोरधस्तात्,
उत्तराग्रं निदध्यात् ॥ ततः अर्घोऽर्घोऽर्घः इत्यन्येनोक्ते, यजमा
नो दूर्वा-ऽक्षत-फल-चन्दन-दधि-जलयुतमर्घपात्रं गृहीत्वा ॐ
अर्घः प्रतिगृह्यताम् इति वदेत् ॥ अर्चनीयः ॐ अर्घं प्रतिगृह्णा
मि इत्यभिधाय यजमानहस्तादर्घपात्रं गृहीत्वा ॐ आपस्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति प्रजापतिरृषिरापो देवता यजुरर्घग्रहणे विनियोगः॥ ॐ आ
पस्थ युष्माभिः सर्वान्कामानवाप्नवान् इति शिरसि अक्षतादिकं
किञ्चिद्दत्वा ॐ समुद्रं व इत्याथर्वण ऋषिरनुष्टुप्छन्द आपो दे
वताऽर्घोऽभिमन्त्रणे विनियोगः॥ ॐ समुद्रं वः प्रहिणोमि स्वां यो
निमभिगच्छत॥ अरिष्टाऽस्माकं वीरा मापरासेचि मत्पयः॥ इत्य
र्घपात्रमैशान्यां त्यजन् पठेत्॥ ततः आचमनीयमाचमनीय-
माचमनीयम् इत्यन्येनोक्ते, यजमानः आचमनीयमादाय ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचमनीयं प्रतिगृह्यताम् इति वदेत् ॥ अर्चनीयः ॐ आचमनी
यं प्रतिगृह्णामि इत्यभिधाय यजमानहस्तादाचमनीयमादाय
ॐ आमागन्निति परमेष्ठीऋषिर्बृहतीछन्दः आपो देवताऽऽचम
ने विनियोगः ॥ ॐ आमागन्यशसासꣳसृजवर्चसा तम्मा कुरु
प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम् ॥ इति मन्त्रेण आ
चम्य द्विस्तूष्णीमाचामेत् ॥ ततो मधुपर्को मधुपर्को मधुपर्कः, इ
त्यन्येनोक्ते, यजमानः कांस्यपात्रस्थितानि दधि-मधु-घृतानि कां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यपात्रपिहितानि आदाय ॐ मधुपर्कः प्रतिगृह्यताम् इति व
देत् ॥ अर्चनीयः ॐ मधुपर्कं प्रतिगृह्णामि इत्यभिधाय दातृकर
स्थमेव ॐ मित्रस्यत्वेति बृहस्पतिऋषिर्मधुपर्को देवता यजुर्मधु
पर्कावेक्षणे विनियोगः ॥ ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ इति नि
रीक्ष्य ॐ देवस्य त्वेति बृहस्पतिराङ्गिरसऋषिः सविता देवता यजुर्म
धुपर्कग्रहणे विनियोगः ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहु
भ्याम्पूष्णो हस्ताभ्याम् ॥ प्रतिगृह्णामि ॥ इति मधुपर्कपात्रं गृही

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा वामहस्ते कृत्वा ॐ नमः श्यावास्यायेति प्रजापतिर्ऋषिः सवि
तादेवता यजुर्मधुपर्काऽऽलोडने विनियोगः॥ ॐ नमः श्यावास्याया
न्नशने यत्र आविद्धन्तत्ते निष्कृन्तामि॥ इति अनामिकया प्रद
क्षिणमालोड्य अनामिकाङ्गुष्ठाभ्यां किञ्चिद्भूमौ निःक्षिप्य पु
नर्द्धं निःक्षिपेत्॥ ततः ॐ यन्मधुन इति कुत्सऋषिर्जगतीच्छन्दो
मधुपर्कौ देवता मधुपर्कप्राशने विनियोगः॥ ॐ यन्मधुनो मध 2
व्यं परमꣳ रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्येन परमो मधव्योन्नादोऽसानि ॥ इति समन्त्रं त्रिवारं प्राश्नीयात् ॥
ततो मधुपर्कपात्रं पूर्वस्यां असञ्चरे धृत्वा आचम्य ॐ वाङ्म इत्या
दीनां सप्तानां परमेष्ठी ऋषिर्दैवी-गायत्रीच्छन्दः परमात्मा देवता
प्राणस्पर्शने विनियोगः ॥ दक्षिणकरस्य संहताभिस्तिसृभिस्तर्जनी-
मध्यमा-ऽनामाभिः ॐ वाङ्म आस्येऽस्तु इति मुखं स्पृशेत् ॥ हस्तौ प्र
क्षाल्य अङ्गुष्ठप्रदेशिनीभ्याम् ॐ नसोर्मे प्राणोऽस्तु इति नासिका
रन्ध्रद्वयं स्पृशेत् ॥ अङ्गुष्ठाऽनामिकाभ्याम् ॐ अक्ष्णोर्मे चक्षुरस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति युगपच्चक्षुषी स्पृशेत् ॥ अङ्गुष्ठानामिकाभ्यामेव ॐ कर्णयोर्मे
श्रोत्रमस्तु इति मन्त्राऽऽवृत्त्या दक्षिणोत्तरौ कर्णौ स्पृशेत् ॥ संहताङ्गु
ल्यग्रैः ॐ बाह्वोर्मे बलमस्तु इति बाहुमूलयोः स्पृशेत् ॥ असंहता
ङ्गुलिभ्यां पाणिभ्याम् ॐ ऊर्वोर्मे ओजोऽस्तु इति युगपदूरू स्पृशे
त् ॥ ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु इति शिरःप्रभृ
ति पादपर्यन्तं पाणिभ्यामालभेत् ॥ तत आचमनं कुर्यात् ॥ ततो य
जमानः खड्गप्रतिनिधिं कुशतरुणमादाय गौर्गौर्गौः इत्यन्यतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

के, आलभ्यतामिति वदेत् ॥ अर्घे मा ऽऽलभ्यताम् इत्युक्त्वा मन्त्रं
पठेत् ॥ ॐ माता रुद्राणामिति ब्रह्मा ऋषिस्त्रिष्टुप्छन्दो गौर्देवता गो
रभिमन्त्रणे विनियोगः ॥ ॐ माता रुद्राणां दुहिता वसूनां स्व
साऽऽदित्यानाममृतस्य नाभिः ॥ प्रनुवोचं चिकितुषे जनाय मागाम
नागामदितिं वधिष्ट ॥ मम अमुक यजमानस्य च पाप्माहतः ॐ
इत्युपांशु पठित्वा, उत्सृजत तृणान्यत्तु इत्युच्चैर्ब्रूयात् ॥ ततः कुश
पत्रस्योत्सर्जनमेव नालम्भनम् ॥ ॥ इति मधुपर्कः ॥ शिवम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६८४१

॥

कन्यादानम्

मूल्य रू १०।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क.स्वा. श्रीगणेशाय नमः ॥ ॥ सन्धिविग्रहमन्त्रीन्द्रदेवादत्ततनूद्भवः ॥ भू
१ मिपालशिरोरत्नरञ्जितमाङ्घ्रिसरोरुहः ॥ १ ॥ सान्धिविग्रहिकः श्रीमद्वी
रेश्वरसहोदरः ॥ महामहत्तकः श्रीमान्विराजति गणेश्वरः ॥ २ ॥ श्री
मता रामदत्तेन मन्त्रिणा तस्य सूनुना ॥ पद्धतिः क्रियते धर्म्या रम्या
वाजसनेयिनाम् ॥ ३ ॥ ॥ तत्रादौ विवाहः ॥ तत्र कन्याहस्तेनषो
डशहस्तं मण्डपम् ॥ तद्दक्षिणादिशि पश्चिमां दिशमाश्रित्य मण्ड
पसंलग्नमुत्तराभिमुखं कौतुकागारम् ॥ मण्डपाद्बहिरैशान्यां जा राम: १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातृचतुर्हस्तां सिकतादिपरिष्कृतां तुषकेशशार्करादिशून्यां वेणुनि
र्मितां वेदीं चकारयेत् ॥ विवाहदिने कृतनित्यक्रियेण जामातृपि
त्रा मातृपूजापूर्वकमाभ्युदयिकं कर्त्तव्यम् ॥ कन्यापिता शुचिरा
चान्तः शुक्लाम्बरधरः कृतनित्यक्रियो मातृपूजाभ्युदयिके कृत्वा
आहरणवेलायां मण्डपे प्रत्यङ्मुखः प्राङ्मुखं वरं ऊर्ध्वजानुं सम्बो
ध्य ॐ साधु भवानास्तामित्यस्य प्रजापतिरृषिर्यजुर्ब्रह्मा देवता
वरार्चने विनियोगः ॥ ॐ साधु भवानास्तामर्चयिष्यामो भवन्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्या.
२

इति ब्रूयात् ॥ ॐ अर्चय इति प्रत्युक्ते वरोपवेशनार्थं शुद्धमासनं
दत्वा, विष्टरमादाय ॐ विष्टरो विष्टरो विष्टरः इत्यन्येनोक्ते य
जमानः ॐ विष्टरः प्रतिगृह्यतां इति वदेत् ॥ वरः ॐ विष्टरं प्रति
गृह्णामि इत्यभिधाय विष्टरं गृहीत्वा ॐ वर्ष्मोस्मीत्यस्य वेदगर्भ
षिर्विष्टरो देवता ऽनुष्टुप्छन्दः, आत्मस्तुतिपूर्वकोपवेशने विनियो
गः ॥ ॐ वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः ॥ इमन्तमभितिष्ठा
मि यो मा कश्चाभिदासति ॥ इत्यनेन आसने उत्तराग्रं धृत्वा वि रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तृणोपरि उपविशेत् ॥ तत उपविश्य यजमानः पाद्यमञ्जलि
ना आदाय ॐ पाद्यं पाद्यं पाद्यं इत्यन्येनोक्ते ॐ पाद्यं प्रतिगृ
ह्यताम् इति वदेत् ॥ ततो वरः ॐ पाद्यं प्रतिगृह्णामि इत्यभि
धाय यजमानाञ्जलितः अञ्जलिना पाद्यमादाय ॥ ॐ विरा
जो दोहोसीति प्रजापतिऋषिरापो देवता यजुः पादप्रक्षालने वि
नियोगः ॥ ॐ विराजो दोहोसि विराजो दोहमसीय मयि पाद्यायै
विराजो दोहः ॥ इति दक्षिणपादं प्रक्षालयति ॥ अनेनैव क्रमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्या. २

ण, अनेनैव मन्त्रेण वामपादं प्रक्षालयति ॥ ततो यजमानः
अनेनैव मन्त्रेण कन्याया अपि प्रथमं वामपादं पश्चाद्दक्षि
णपादं च प्रक्षालयति ॥ अस्मिन्समये कन्यापिता बान्धवैः
सह वरस्य कन्यायाश्च पादौ प्रक्षालयति इति आचारः ॥ त
तो वरः पूर्ववद्दिक्षुरान्तरं गृहीत्वा चरणयोरधस्तादुत्तराग्रं कुर्या
त् ॥ ततो यजमानः दूर्वा-ऽक्षत-फल-चन्दन-जलयुत शङ्खा
र्घपात्रं गृहीत्वा ॐ अर्घो ऽर्घो ऽर्घः इत्यन्येनोक्ते ॐ अर्घः प्र

राम: २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिगृह्यताम् इतिवदेत्॥ वरः ॐ अर्घं प्रतिगृह्णामि इत्यभि
धाय यजमानहस्तादर्घपात्रं गृहीत्वा ॐ आपस्थेति प्रजाप
तिऋषिरापोदेवता यजुश्छन्दोऽर्घग्रहणे विनियोगः॥ ॐ आ
पस्थयुष्माभिः सर्वान्कामानवाप्नवानि॥ इति मन्त्रेण मूर्द्धपर्य
न्तमानीय शिरसार्घमभिनन्द्य शिरसि किञ्चिदक्षतादिकं द
त्वा ॐ समुद्रं वः इत्याथर्वण ऋषिरापो देवताऽनुष्टुप्छन्दोऽ
र्घाभिमन्त्रणे विनियोगः॥ ॐ समुद्रं वः प्रहिणोमि स्वां योनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मभिगच्छन ॥ अरिष्टास्माकं वीरा मापरासेचि मत्पयः ॥ इति अ
र्घपात्रमैशान्यां त्यजन् पठति ॥ ततो यजमानः आचमनीय
मादाय ॐ आचमनीयमाचमनीयमाचमनीयम् इत्यन्तेनो
क्ते ॐ आचमनीयं प्रतिगृह्यतामिति वदेत् ॥ ततो वरः ॐ आ
चमनीयं प्रतिगृह्णामि इत्यभिधाय यजमान हस्तादाचम
नीयमादाय ॐ आमागन्निति परमेष्ठी ऋषिरापो देवता बृह
तीच्छन्द आचमने विनियोगः ॥ ॐ आमागन् यशसासꣳसृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जवर्चसा ॥ तम्माकुरु प्रियं प्रजानाम्मधिपतिं पशूनामरिष्टिं तनू
नाम् ॥ इत्यनेन सकृत् आचामति ॥ द्विस्तूष्णीं आचामेत् ॥
ततो यजमानः कांस्यपात्रस्थितानि दधिमधुघृतानि कांस्यपा
त्रेण पिहितानि, आदाय ॐ मधुपर्को मधुपर्को मधुपर्कः इत्य
न्येनोक्ते ॐ मधुपर्कः प्रतिगृह्यतामिति वदेत् ॥ ततो वरः ॐ
मधुपर्कं प्रतिगृह्णामि इत्यभिधाय ॐ मित्रस्य त्वेति बृहस्प
तिऋषिर्मधुपर्को देवता पङ्क्तिश्छन्दो, मधुपर्कावेक्षणे विनियो यजु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्या. ग:॥ ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ इति दातृकरस्थमेव नि
५ रीक्ष्य ॐ देवस्य त्वेति बृहस्पतिराङ्गिरसऋषिः सविता देवता य
जुर्मधुपर्कग्रहणे विनियोगः॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्वि
नोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ प्रतिगृह्णामि ॥ इत्यनेन म
धुपर्कं गृहीत्वा वामहस्ते कृत्वा ॐ नमस्यावेति प्रजापतिऋ
षिः सविता देवता यजुर्मधुपर्कालोडने विनियोगः॥ ॐ नमस्या
वास्यायान्नशने यत्र आविद्धं तत्ते निष्कृन्तामि ॥ इति अना रामः ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिकया प्रदक्षिणमालोड्य अनामिकाङ्गुष्ठाभ्यां किञ्चिद्भूमौ
निःक्षिपेत् ॥ पुनस्तथैव द्विर्निःक्षिपेत् ॥ ततः ॐ यन्मधुन इ
ति कुत्स ऋषिर्मधुपर्को देवता जगतीच्छन्दो मधुपर्कप्राशने
विनियोगः ॥ ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यम् ॥ ते
नाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्ना
दोसानि ॥ इत्यनेन अनामिकाङ्गुष्ठाभ्यामादाय वारत्रयं मधु
पर्कप्राशनम् ॥ प्रतिप्राशने एतन्मन्त्रपाठः ॥ ततो मधुपर्कशेषं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वे

कुशा. असश्चरदेशे धारयेत् ॥ तत आचम्य ॐ वाङ्म इत्यादीनां सप्तानां
६ परमेष्ठी ऋषिर्दैवी गायत्री छन्दः परमात्मा देवता प्राणस्पर्शने वि
नियोगः ॥ ॐ वाङ्म आस्येऽस्तु ॥ ॐ नसोर्मे प्राणोऽस्तु ॥ ॐ अक्ष्णो
र्मे चक्षुरस्तु ॥ ॐ कर्णयोर्मे श्रोत्रमस्तु ॥ ॐ बाह्वोर्मे बलमस्तु ॥ ॐ
ऊर्वोर्मे ओजोऽस्तु ॥ ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह
सन्तु ॥ इति आस्यादि प्रत्येकं सर्वगात्राणि स्पृष्ट्वा, यजमाने
न ॐ गौर्गौर्गौः इत्यभिहिते वरः कुशपत्रं गृहीत्वा ॐ मा काम: ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति,उपांशुजपेत्

ता रुद्राणामितिब्रह्मऋषिर्गौर्देवता त्रिष्टुप्छन्दो गोरभिमन्त्रणे
विनियोगः॥ ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्याना
ममृतस्य नाभिः॥ प्रनुवोचं चिकितुषे जनाय मागामनागाम
दितिं वधिष्ट॥ मम च अमुष्य अमुकशर्मणः यजमानस्य
पाप्माहतः ॐ॥ उत्सृजत तृणान्यत्तु इति उच्चैर्जपित्वा तृणंत्यजेत्
ततो वेदिकायां तुषकेशशर्करादिशून्यायां हस्तमात्रांचतुरस्रां
भूमिं कुशैः परिसमूह्य तानैशान्यां परित्यज्य गोमयोदकेनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कन्या. पलिप्य स्फ्येन स्रुवमूलेन वा प्रागग्रं प्रादेशमितमुत्तरोत्तरक्रमेण
७ त्रिरुल्लिख्य उल्लेखनक्रमेणैव अनामिकाङ्गुष्ठाभ्यामुद्धृत्य ज
लेनाभ्युक्ष्य तूष्णीं कांस्यपात्रस्थवह्निं प्रत्यङ्मुखं समाधाय तद्रक्षा धा
र्थं कञ्चिदनुरूपं नियुज्य कौतुकागाराद्वरः कन्यामानीय मण्ड
पे वरः परिधानवस्त्रं गृहीत्वा ॐ जरां गच्छेति प्रजापतिरृ
षिर्वासो देवता त्रिष्टुप्छन्दो वस्त्रपरिधाने विनियोगः॥ ॐ ज
रां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा॥ शतं च राम:
७

CC-0. In Public Domain. Digitization by eGangotri

जीव शरदः सुवर्चारयिं च पुत्रा ननुसंव्ययस्वायुष्मतीदं परि
धत्स्व वासः॥ इति पठित्वा वरः परिधानवस्त्रं तस्यै दद्यात्॥
तत उत्तरीयमादाय ॐ या अकृन्तन्निति प्रजापतिऋषिर्वा
सो देवता जगतीच्छन्द उत्तरीय परिधाने विनियोगः॥ ॐ या वस्त्र
अकृन्तन्नवयं या अतन्वत॥ याश्च देवीस्तन्तूनभितो ततन्थ॥
तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्ववासः॥ इति प
ठित्वा उत्तरीयं च तस्यै दद्यात्॥ ततो यजमानः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्म परिधानवस्त्रं उत्तरीयवस्त्रं च वराय दद्यात् ॥ ततः ॐ परि
 धास्य इत्याथर्वणऋषिलिङ्गोक्ता देवता पङ्क्तिश्छन्दो वस्त्रपरि
धाने विनियोगः ॥ ॐ परिधास्ये यशो धास्ये दीर्घायुस्त्वाजरद य
ष्टिरस्मि ॥ शतं जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययि
ष्ये ॥ इति पठित्वा वरः परिधानवस्त्रं परिधत्ते ॥ ॐ यशसा
मेत्याथर्वणऋषिलिङ्गोक्ता देवता त्रिष्टुप्छन्दः उत्तरीयव
स्त्रपरिधाने विनियोगः ॥ ॐ यशसा मा द्यावापृथिवी यशसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेन्द्रा बृहस्पती ॥ यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम् ॥ इति
पठित्वा उत्तरीयं परिधत्ते ॥ ततो वरः कन्यायै भूषणादिकं दद्यात्
॥ यजमानश्च वराय भूषणादिकं दद्यात् ॥ ॐ अलङ्करणमिति
मन्त्रस्य भारद्वाजऋषिरुष्णिक्छन्दोऽलङ्करणो देवताऽलङ्कर
णधारणे विनियोगः ॥ ॐ अलङ्करणमसि भूयोऽलङ्करणं
भूयात् ॥ इति पठित्वा धारयेत् ॥ ततो वरस्य कन्यायाश्च द्विरा
चमनम् ॥ ततः कन्याप्रदस्य परस्परं समञ्जेथामिति प्रेषेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्यावरयोः परस्परमभिमुखीकरणम् ॥ ॐ समञ्जन्त्वित्या
थर्वणऋषिर्लिङ्गोक्तादेवताऽनुष्टुप्छन्दः समञ्जने विनियोगः
ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ ॥ सम्मातरि
श्वा सन्धाता समुदेष्ट्री दधातु नौ ॥ इति वरः पठति ॥ ततः
कन्याप्रदकर्तृक ग्रन्थिबन्धनं सा-ऽक्षत-दूर्वा-सिन्दूर-द्र
व्य-पूग-यज्ञोपवीत-सर्षप-हरिद्रादिभिः ॥ ॥ अथ क
न्यादानम् ॥ ॥ दाता वधूवरयोर्दक्षिणतः स्वदक्षिण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देशास्थपत्नीसहितः उदङ्मुखो बद्धशिखः वरं पूर्वमुखं कन्यां पश्चि
ममुखीं कृत्वा शुचिराचम्य कुशपाणिः प्राणानायम्य लग्नस्थ
दोषशान्त्यर्थं गोदानं कुर्यात्॥ गां नन्दिकेश्वरद्रव्यं वा ॐनमो
गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥ नमो ब्रह्मसुताभ्यश्च प
वित्राभ्यो नमो नमः॥ इति सम्पूज्य ब्राह्मणं च ॐनमो ब्रह्म
ण्यदेवाय गोब्राह्मणहिताय च॥ जगद्धिताय कृष्णाय गो
विन्दाय नमो नमः॥ इति सम्पूज्य संकल्पं कुर्यात्॥ अहंम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्या. म अस्याः कन्यायाः लग्नस्थदुष्टग्रहसूचिताऽरिष्टशान्तिपूर्व
१० कशुभफलप्राप्त्यर्थं इमां गां रुद्रदेवताकां तत्प्रत्याम्नायीभू
तं गोप्यं चन्द्रदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय
गोदानत्वेन तुभ्यमहं सम्प्रददे ॥ प्रार्थना ॥ कपिले सर्वदेवानां
पूजनीयासि रोहिणी ॥ तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्र
यच्छ मे ॥ दानप्रतिष्ठा ॥ अद्य कृतैतद्गोदानकर्मणः साङ्ग
फलप्राप्त्यर्थं गोप्यं चन्द्रदैवतं अमुकगोत्राय अमुकशर्म दान: १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे ॥ ततः प्रति
ज्ञासंकल्पं कुर्यात् ॥ कुशादीन्यादाय ॥ अद्येह मम समस्त
पितॄणां ब्रह्मलोकावाप्तये श्रीलक्ष्मीनारायणप्रीतये कन्यादा
नकल्पोक्तब्राह्मविधिना कन्यादानमहं करिष्ये ॥ इति संक
ल्प्य अङ्गुष्ठ दूर्वाक्षतफलकुशयवतिलजलान्यादाय व
रदक्षिणकरोपरि कन्यादक्षिणकरं निधाय ॐ दाताहं व
रुणो राजा द्रव्यमादित्यदैवतम् ॥ वरोसौ विष्णुरूपेण प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्या.
११

गृह्णात्वयम्विधिः॥ इति पठित्वा॥ कन्यायाः दक्षिणकराङ्गुष्ठं
गृहीत्वा संकल्पं कुर्यात्॥ ॐ अद्यामुकमासीयाऽमुकपक्षीया
मुकतिथौ अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः प्र
पौत्राय, अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पौ
त्राय, अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पुत्रा
य. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः प्रपौत्रीं,
अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पौत्रीं, अमुक

रामः
११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पुत्रीं॰ इतिवारत्रयं
पठित्वा; अनेन वरेण अस्यां कन्यायामुत्पत्स्यमान सन्तान्या
द्वादशावरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुमानश्च श्रीलक्ष्मी
नारायणप्रीत्यर्थं अमुकगोत्राय अमुकप्रवराय अमुकशर्म
णे ब्राह्मणाय वराय; अमुकगोत्रां॰ अमुकप्रवरां अमुकना
म्नीं इमां सालङ्कारां कन्यां प्रजापतिदैवतां ज्योतिष्टोमादिय
ज्ञसमफलस्वर्गकामः पत्नीत्वेन तुभ्यमहं संप्रददे॥ इति क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यांपाः दक्षहस्ताङ्गुष्ठं वरहस्ते दद्यात्॥ प्रार्थना॥ ॐ कन्यां
कनकसंयुक्तां कनकाभरणैर्युताम्॥ दास्यामि विष्णवे तुभ्यं ब्र
ह्मलोकजिगीषया॥१॥ विश्वम्भरः सर्वभूतात्मा साक्षिणःसर्व
र्वदेवताः॥ इमां कन्यां प्रदास्यामि पितृणां तारणाय च॥२॥
कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः॥ कन्ये मे पृष्ठतो
भूयास्त्वद्दानान्मोक्षमाप्नुयाम्॥३॥ अस्मिन्समये अस्त्वलग्र
न्थिबन्धनम्॥ ॐ स्वस्तीति प्रतिवचनम्॥ ततः ॐ घोरस्त्वेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता कन्यापाणिग्रह
णे विनियोगः॥ ॐ द्यौस्त्वा ददातु पृथिवीत्वा प्रतिगृह्णातु॥
इति वरः पठेत्॥ ततः कन्याप्रदः॥ ॐ अद्यकृतैतत्कन्यादानप्र
तिष्ठार्थं इदं सुवर्णं अग्निदैवतं अमुकगोत्राय अमुकप्रव
राय अमुकशर्मणे ब्राह्मणाय वराय दक्षिणां तुभ्यमहं संप्र
ददे॥ इति दानप्रतिष्ठां दद्यात्॥ ॐ स्वस्तीति प्रतिवचनम्॥
अथ गोदानम्॥ गां ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्य एव च ॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ इति
संपूज्य संकल्पं कुर्यात् ॥ अहं मम अनेकजन्मार्जितपापक्ष
यपूर्वकं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं इमां सालङ्कारां
सवत्सां गां रुद्रदेवताकां अमुकगोत्राय अमुकप्रवराय अ
मुकशर्मणे ब्राह्मणाय वराय तुभ्यं संप्रददे ॥ प्रार्थना ॥
कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥ तीर्थदेवमयी
यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥ दानप्रतिष्ठा ॥ अघकृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नत्सालङ्कार सवत्स गोदानकर्मणः साङ्गफलप्राप्त्यर्थं ......
...... दैवतं अमुकगोत्राय अमुकप्रवराय अमुकशर्मणे
ब्राह्मणाय वराय दानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे ॥ ॥
ॐ ब्राह्मणमद्य विदेयम्पितृमन्तं पैतृमत्यमृषिमार्षेयꣳसु
धातु दक्षिणम् ॥ अस्मद्राता देवत्रा गच्छत प्रदातारमा वि
शत ॥१॥ अग्नये त्वा मह्यं वरुणो ददातु सो मृतत्वमशी
यायुर्दात्र ऽ एधि मयो मह्यम्प्रतिगृहीत्रे रुद्राय त्वा मह्यं वरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णो ददातु सो मृतत्वमशीय प्राणोदात्र ऽ एधि वयो मह्यं प्र
तिग्रहीत्रे बृहस्पतयेत्वा मह्यं वरुणो ददातु सो मृतत्वमशी
यत्वग्दात्र ऽ एधि मयो मह्यम्प्रतिग्रहीत्रे यमायत्वा मह्यं व
रुणो ददातु सो मृतत्वमशीय हयो दात्र ऽ एधि वयो मह्यम्प्र
तिग्रहीत्रे ॥ २ ॥ को दात्कस्मा ऽ अदात्कामोदात्कामाया
दात् ॥ कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥ ३ ॥ इति
प्रसादमन्त्राः ॥ ततस्तां पाणौ गृहीत्वा ॐ यदैषीत्याथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेण ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दो निष्क्रमणे विनि
योगः॥ ॐ यदेषि मनसा दूरं दिशोनुपवमानो वा हिरण्य
पर्णो वैकर्णः सत्वा मन्मनसां करोतु श्री अमुक देवी इ
ति पठन्निष्कामति॥ ॥ इति कन्यादानम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ पुण्याहवाचनम् ॥

ऋ. नं. १६८४०

मूल्य रु. ३।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्या.
१

श्रीगणेशाय नमः ॥ ॥ अथ पुण्याहवाचनम् ॥ ॥ अद्ये
ह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा सपुत्रा सप
रिवारा ...... देवी, अहं मम करिष्यमाणसुवर्णतुलापुरुषमहादानक
र्मणि, एभिश्चन्दनपुष्पाक्षतपुगीफलद्रव्यवासोभिः सर्वाऽभ्युद
यप्राप्तये पुण्याहवाचनार्थं ब्रह्मन् त्वामहं वृणे ॥ ॐ वृतोऽस्मि
अद्येह काश्यपगोत्रायाः काश्यपावत्सारनैध्रुवेति त्रिप्रवरायाः
सपुत्रायाः सपरिवारायाः, अमुकीदेव्याः, मम करिष्यमाणसुवर्ण राम:
१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुलापुरुष महादानकर्मणि मण्डपे भो ब्राह्मणाः "पुण्याहं भवन्तो
ब्रुवन्तु३" ॥ "ॐ पुण्याहम् ३" ॐ पुनन्तु मा देवजनाः पुनन्तु
मनसा धियः ॥ पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥ १ ॥
अद्येह काश्यपगोत्रायाः काश्यपावत्सारनैध्रुवेति त्रिप्रवरायाः
सपुत्रायाः सपरिवारायाः ''''''देव्याः, मम करिष्यमाण सुवर्णतुलापुरुष
महादानकर्मणि मण्डपे भोब्राह्मणाः "स्वस्ति भवन्तो ब्रुवन्तु३"
॥ "ॐ स्वस्ति ३" ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थर्ववेदाः॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
॥२॥ अद्येह काश्यपगोत्रायाः काश्यपावत्सारनैध्रुवेति त्रिप्रव
रायाः सपुत्रायाः सपरिवारायाः ..... देव्याः, मम करिष्यमाण सुवर्ण
तुलापुरुषमहादानकर्मणि मण्डपे भो ब्राह्मणाः "ऋद्धिं भवन्तो
ब्रुवन्तु ३" ॥ "ॐ ऋध्यताम् ३" ॐ सत्रस्य ऋद्धिरस्यगन्मज्योति
रमृता अभूम॥ दिवं पृथिव्या अध्यारुहामाविदाम देवान्त्स्व-
र्ज्योतिः॥३॥ अद्येह काश्यपगोत्रायाः काश्यपावत्सारनैध्रुवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नि त्रिप्रवरायाः सपुत्रायाः सपरिवारायाः ''''' देव्याः, मम करि
ष्यमाणसुवर्णतुलापुरुषमहादानकर्मणि मण्डपे भो ब्राह्मणाः "वृ
द्धिं भवन्तो ब्रुवन्तु ३"॥ "ॐ वृध्यन्ताम् ३" ॐ ज्यैष्ठ्यञ्चमऽ
आधिपत्यञ्चमे मन्युश्च मे भामश्च मे मश्च मेम्भश्च मे जेमा च
मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्रा
घिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥ अद्ये
ह काश्यपगोत्रायाः काश्यपावत्सारनैध्रुवेति त्रिप्रवरायाः'''''

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुराणा. ३ देव्याः, मम करिष्यमाणसुवर्णतुलापुरुषमहादानकर्मणि मण्डपे भो
ब्राह्मणाः "श्रियं भवन्तो ब्रुवन्तु ३"॥ "ॐ श्रीः ३" ॐ मनसः
काममाकूतिं वाचः सत्यमशीय। पशूनां रूपमन्नस्य रसो य
शः श्रीः श्रयतां मयि ॥ ५ ॥ अद्येह काश्यपगोत्रा, काश्यपावत्सा याः
रनैध्रुवेति त्रिप्रवरायाः सपुत्रायाः सपरिवारायाः ..... देव्याः,
ष्य मम करिष्यमाणसुवर्णतुलापुरुषमहादानकर्मणि मण्डपे भो ब्राह्म
णाः "कल्याणं भवन्तो ब्रुवन्तु ३"॥ "ॐ कल्याणम् ३" ॐ रामः ३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेमां वाचं कल्याणीमावदानि जनेभ्यः॥ ब्रह्मराजन्याभ्या७
शूद्राय चार्याय च स्वाय चारणाय च॥ प्रियो देवानान्दक्षिणा
यै दातुरिह भूयासमयम्मे कामः समृद्ध्यताम्॥६॥ अद्येह
काश्यपगोत्रायाः काश्यपावत्सारनैध्रुवेति त्रिप्रवरायाः सपु
त्रायाः सपरिवारायाः......देव्याः, मम करिष्यमाणसुवर्णतुलापुरुष
महादानकर्मणि मण्डपे भो ब्राह्मणाः "शान्तिं भवन्तो ब्रुवन्तु३"
ॐ शान्तिः३"॥ "ॐ द्यौः शान्तिरन्तरिक्ष७ शान्तिः पृथिवी शान्तिरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पः शान्तिरोषधयः शान्तिः॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्ति
र्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि॥
विश्वानि देवसवितर्दुरितानि परासुव॥ यद्भद्रं तन्नऽआसुव॥७
॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः॥ शत्रूणां
बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥ ॥ शिवम्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १५८३६

वसन्तराग

मू० ४।–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व·रा· श्रीगणेशाय नमः॥ अथ वसन्तरागप्रारम्भः॥ पद्मा पयोधर
तटी परिरम्भलग्न काश्मीरमुद्रितमुरो मधुसूदनस्य॥ व्यक्ता
१ नुरागमिव खेलदनङ्गखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं वः॥
१॥ वसन्ते वासन्तीकुसुमसुकुमारैरवयवै भ्रमन्तीं कान्तारे
बहुविहितकृष्णानुसरणाम्॥ अमन्दं कन्दर्पज्वरजनितचि
न्ताकुलतया वलद्बाधां राधां सरसमिदमूचे सहचरी॥ २॥
ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे॥ मधुकर १

रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निकरकरंबितकोकिलकूजितकुञ्जकुटीरे ॥ विहरति हरिरिह
सरसवसन्ते ॥ नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरन्ते ॥१॥ उन्मदमदनमनोरथपथिकवधूजनजनितविलापे
॥ अलिकुलसंकुलकुसुमसमूहनिराकुलवकुलकलापे ॥ विह-
रति हरिरिह सरसवसन्ते ॥ नृत्यति युवतिजनेन समं सखि-
विरहिजनस्य दुरन्ते ॥२॥ मृगमदसौरभरभसवशंवदनवद
लमालतमाले ॥ युवजन हृदयविदारणमनसिजनखरुचि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंशुकजाले ॥ विहरति हरिरिह सरसवसन्ते ॥ नृत्यति युव-
 तिजनेन समं सखि विरहिजनस्य दुरन्ते ॥३॥ मदन महीपति·
 कनकदण्डरुचि· केशर कुसुमविकाशे ॥ मिलित शिलीमुख
पाटलिपटल कृत स्मरतूणविलासे ॥ विहरति हरिरिह सरसव
सन्ते ॥ नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते
॥४॥ विगलित लज्जित जगदवलोकित तरुण करुण कृतहासे॥
विरहिनिकृन्तन कुन्तमुखाकृति केतकि दन्तुरिताशे ॥ विहरति·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिरिह सरसवसन्ते ॥ नृत्यति युवतिजनेन समं सखि विरहि-
जनस्य दुरन्ते ॥५॥ माधविका परिमल ललिते नवमालिक
यातिसुगन्धौ ॥ मुनिमनसामपि मोहनकारिणि तरुणाकारण
बन्धौ ॥ विहरतिहरिरिह सरसवसन्ते ॥ नृत्यति युवतिजनेन
समं सखि विरहिजनस्य दुरन्ते ॥६॥ स्फुरदतिमुक्तलता परिर
म्भण मुकुलित पुलकित चूते ॥ वृन्दावनविपिने परिसर परिग
त यमुनाजलपूते ॥ विहरति हरिरिह सरसवसन्ते नृत्यति युवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जनेन समं सखि विरहिजनस्य दुरन्ते ॥ ७ ॥ श्रीजयदेव
व.ग. भणितमिदमुदयति हरिचरणस्मृतिसारम् ॥ सरसवसन्त
३ समयवनवर्णनमनुगतमदनविकारम् ॥ ८ ॥ दरविदलित
मल्लीवल्लिचञ्चत्पराग प्रकटितपटबासैर्वासयन्कानना-
नि ॥ इह हि दहति चेतः केतकीगन्धबन्धुः प्रसरदसमबा
णप्राणवद्गन्धवाहः ॥ १ ॥ वेदानुद्धरते जगन्निवहते भू- ३
गोलमुद्बिभ्रते दैत्यान्दारयते बलिं छलयते क्षत्रक्षयं कु- रामः

CC-0. In Public Domain. Digitization by eGangotri

व॰रा॰ वीते ॥ पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते॰
४ म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ २ ॥
इति वसन्तरागः समाप्तः ॥ शुभम् ॥ ॥ ॥ ॥

४
रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यनारायणव्रतकथा
(दूनाक्कि व्वीसहित)

दे. नं १६८३८

मूल्य १०।–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ नमः स्वस्तिश्रीमद्गुरुगणेशगौर्य्यै नमो नमः ॥ अथ संक्रांतौ सत्यनारायणव्रतपूजाविधिर्लिख्यते ॥
संक्रांतौ प्रातर्नद्यादौ तीर्थे स्नात्वा कृतनित्यक्रियस्सन् प्रतिज्ञां कुर्यात् । संकल्पः अद्येत्यादि अद्य मम स
कलपापक्षयपूर्वकश्रुतिस्मृतिपुराणागमोक्तफलावाप्तये श्रीसत्यनारायणप्रीतये वा ऽमुकसंक्रांति
व्रतमहं करिष्ये एतत्संक्रांतिदिवसमुपोष्य मधुसूदन । प्रदोषे तव सत्पूजां कृत्वा देव मनोहराम् नक्तं
भोजनमासाद्य सत्यरूप विचिंतये जन्मजन्मान्तरकृतं यन्मे पापं हराच्युत इति प्रतिज्ञां विधाय सत्स्तुव
णादिभिर्दिनं निनाय निशामुखे सर्वाः पूजासामग्रीः संपाद्य । शुचिराचांतः प्राङ्मुखोपविश्य । संध्यावन्द
नादिनित्यक्रियां कृत्वा पूजामारभेत् दीपं प्रज्वाल्य आचम्य दीपं सम्पूज्य गणेशं च सम्पूज्य भूमौ शंखचक्रादि
कं विलिख्य । आसनमासनस्योपरि पात्रं ॐ पवित्रेस्थ इति पवित्रं । शन्नो देवीरिति जलम् । गंधपुष्पाक्षतादि
तस्मिन्निक्षिपेत् अर्घपात्रं सुसंपन्नं सुसंपन्नमस्तु । तेन जलेनात्मानं संप्रोक्ष्य प्राणायामं विधाय । ॐ रामः
पुण्डरीकाक्षाय नमः ॐ विष्णुः ३ पूर्वकमद्येत्यादि । अद्य मम जन्मजन्मोपार्जितसकलपापक्षयद्वारा वि १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आयुः पुत्र पौत्रादि संततिपरिवृद्धत्वं सौभाग्यारोग्य नानाविध धन धान्य रत्न कनक पशु क्षेत्राद्यनेकैश्वर्य नि
रा कुल भोगाद्युत्तर विष्णुलोक परीप्सुर मुकस्यां तिथौ श्रीसत्यनारायणस्य यथामिलितोपचारैः पूजनम
हं करिष्ये ॥ ॐ लोकपालेभ्यो नमः। ॐ नवग्रहेभ्यो नमः। ॐ गणेशाद्यष्टदेवताभ्यो नमः। ॐ द्वारपाले
भ्यो नमः। स्थाल्यामष्टदलं विलिख्य। पूर्वादिक्रमेण पूजयेत् ॥ ॐ नन्दाय नमः। ॐ सुनन्दाय नमः। व
लाय नमः। प्रबलाय नमः। जयाय नमः। विजयाय नमः। सुशीलाय नमः। पुण्यशीलाय नमः। रामलक्ष्म
णौ च पूजयेत् ॥ तन्मध्ये प्रतिमां संस्थाप्य स्नात्वा। एतं तेति सतिष्ठाप्य। श्रीलक्ष्मीसहित सत्यना
रायण इहागच्छ इह तिष्ठ सुप्रतिष्ठितो वरदो भव। इत्यावाह्य ॥ ॥अथ ध्यानम् ॥ ॥ध्यायेत् सत्यं गुणा
तीतं गुणत्रयसमन्वितम् ॥ लोकनाथं त्रिलोकेशं पीताम्बरयुगान्वितम् ॥ इन्दीवरदलश्यामं श्रीव
त्सपदभूषितम् ॥ सुलोचनं चतुर्बाहुं शंखचक्रगदाधरम् ॥ किरीटिनं कुण्डलिनं वनमालाविभूषित
म् ॥ [illegible] नारदादिभिः ॥ भूषितं विविधै रत्नैर्गरुडोपरि संस्थितम् ॥ नारा

CC-0. In Public Domain. Digitization by eGangotri

परं निजानन्दं जगतः पितरं गुरुम्॥आवाहनम्॥आगच्छ देवदेवेश जगद्योने रमापते॥पीठेऽस्मिन्त्वं तिष्ठा
यसन्निधेहि कृपां कुरु॥आसनम्॥देवदेव जगन्नाथ गरुडासनसंस्थित॥गृहाणासनं दिव्यं जगद्भर्त्तर्नमो
स्तु ते॥पाद्यम्॥नानातीर्थाहृतं शुद्धं निर्मलं पुष्पमिश्रितम्॥पाद्यं गृहाण देवत्वं विश्वरूप नमोस्तु ते॥अर्घ्यम्॥
गन्धपुष्पाक्षतोपेतं फलेन च समन्वितम्॥अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः॥आचमनीयम्॥गंगादिसर्व
तीर्थेभ्यो मयानीतं सुशीतलम्॥गृहाणाचमनं सत्यनारायण नमोस्तु ते॥मधुपर्कम्॥दधिक्षौद्रघृतं शुद्धं कपि 2
लायाः सुगंधिमत्॥सुस्वादु मधुरं शौरे मधुपर्कं गृहाण मे॥पुनराचमनीयम्॥पंचामृतस्नानम्॥पयो दधि घृतं
चैव मधुशर्करसंयुतम्॥पंचामृतेन स्नपनं करिष्यामि सुरोत्तम॥क्षीरोदधिनिवासाय लक्ष्मीकान्ताय ते नमः॥
स्नानम्॥मन्दाकिनी गोतमी च यमुना च सरस्वती॥ताभ्यः स्नानार्थमानीतं गृहाण विमलं जलम्॥वस्त्रयुग्म
म्॥शुद्धजाम्बूनदप्रख्यं तडित्स्वरोचिषम्॥मयोपपादितं तुभ्यं वस्त्रयुग्मं गृहाण भो॥यज्ञोपवीतम्॥सुवर्ण
तंतु ग्रथितं कान्तस्वरविभूषितम्॥त्रयीमयं गृहाणेदं शरणागतवत्सल॥पुनराचमनम्॥आभूषणम्॥किरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नकुण्डलादीनि कांचीवलययुग्मकम् ॥ कौस्तुभं वनमालां च भूषणानि भज स्वभो ॥ चन्दनम् ॥ मलयाचलसंभूतं घ-
नसारं सुशोभनम् ॥ कस्तूरीकुंकुमैर्युक्तं गोरोचनसमन्वितम् ॥ हृद्यानन्दनं चारु चन्दनं प्रतिगृह्यताम् ॥ तिलान्
भवान् ॥ पुष्पाणि ॥ मालतीचंपकादीनि यूथिकाबकुलानि च ॥ तुलसीपत्रमिश्राणि गृहाण रमयासह ॥ ॥ ततः
सिन्दूरादिसौभाग्यद्रव्यम् ॥ आभूषणादिकम् ॥ ॐ लक्ष्म्यै नमः ॥ इति नाममंत्रेण दद्यात् ॥ ॥ अथ धूपः ॥ वनस्पति
रसोद्भूतं गंधाढ्यं सुमनोहरम् ॥ धूपं गृहाण गोविन्द गुणसागर गोपते ॥ दीपः ॥ आज्यं च वर्तिसंयुक्तं वह्निना दीपितं
मया ॥ दीपं गृहाण देवेश मम कांतिप्रदो भव ॥ नैवेद्यम् ॥ त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितम् ॥ गृहाण सुमुखो
भूत्वा प्रसीद पुरुषोत्तम ॥ रम्भाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम् ॥ जातीपत्रलवंगेला शर्करा गुडमिश्रितम् ॥ सूपा
द्यं सर्वभक्षाणि स्वीकुरुष्व निवेदितम् ॥ मया श्रद्धावता देव गृहाण जगदीश्वर ॥ पुनराचमनीयम् ॥ करोद्वर्तनम् ॥ ता
म्बूलम् ॥ पूगीफलं सताम्बूलं खादिरादिमनोहरम् ॥ लवंगेलादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ इदं फलमिति फ
लम् ॥ आभरणार्थे द्रव्यम् ॥ हिरण्यम् ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे॥ तिलयवाक्षतपुष्पवर्त्तिकादिगणितद्रव्याणि संकल्पपूर्वकं समर्पयेत्॥ ततो यथाशक्ति जपं कृत्वा गुरुं देवं च प्रणमेत्
ततो नीराजनम्॥ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च। त्वमेव सर्वतेजांसि नीराज्यं प्रतिगृह्यताम्॥ ॥ पुष्पाञ्ज ५
लिः॥ ॐ नमो भगवते तुभ्यं सत्यनारायणाय ते॥ नमस्ते विश्वरूपाय शंखचक्रगदाभृते॥ पद्मनाभाय देवाय हृषीकपतये
नमः॥ नमोऽनन्तस्वरूपाय त्रिगुणात्मविभाजिने॥ लक्ष्मीकान्ताय देवाय जगदानन्दकारिणे॥ सहस्रशिरसे तुभ्यं वाशिव
भूषाय ते नमः॥ ॥ अथ प्रदक्षिणा॥ जय देव जगन्नाथ जय लक्ष्मीपते विभो। त्राहि मां कृपया देव भयाद्व्यथितमानसम्
॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ तानि तानि विनश्यन्तु प्रदक्षिणपदे पदे॥ पापोऽहं पापकर्माहं पापात्मा पापसं
भवः॥ त्राहि मां सर्वलोकेश सर्वपापहरो हरे॥ ततो दधिदूर्वाक्षतपुष्पतिलादिमिश्रं गन्धद्रव्ययुतं शंखार्घ्यमादाय॥ अर्घ्यदान
२ मन्त्रः॥ जातोऽसि दैत्यघातार्थाय देवानां पालनाय च॥ तस्मै देवाय सत्याय सगुणाय महात्मने॥ व्यक्ताव्यक्तस्वरूपाय हृषीकपत
ये नमः॥ गृहाणार्घ्यं मया दत्तं रमया सहितः प्रभो॥ ॥ ततः पुष्पाञ्जलिं गृहीत्वा स्तुतिं पठेत्॥ अमोघं पुण्डरीकाक्षं न
सिंहं दैत्यसूदनम्॥ हृषीकेशं जगन्नाथं वागीशं वरदायकम्॥ योगेश्वरं गुणातीतं गोविन्दं गरुडध्वजम्॥ जनार्दनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतानन्दं श्रीवत्सलं भमधीश्वरम्॥ सत्यनारायणं देवं वन्देहं कामदं विभुम्॥ लीलया चततं विश्वमेवं तस्मै नमो नमः॥ प्रणमा
म्यसदा सत्यनारायणमतः परम्॥ दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते॥ विविधापत्सु घोरेषु दुःखेष्वपि च यद्भयम्॥
विनाशय सदा देव त्वं सर्वमुपसर्गकम्॥ त्वन्मायामोहिताः सर्वे ब्रह्माद्याः त्रिदिवौकसः॥ न जानन्ति गुणं रूपं तवाश्चर्य
मिदं विभो॥ मूढोहं माद्य कथं जाने मोहितस्तव मायया॥ अंसेपूजयेद्भक्त्या यथाविभवसंभवैः॥ पुत्रं वित्तं च मच्चित्तं पाहि
मां चरणागतम्॥ ततो नमस्कारः॥ चरणं ते प्रपद्येहं सर्वकामार्थसिद्धये॥ प्रणमामि सदा देवं सत्यनारायणं गुरुम्॥ क्ष
मापनम्॥ त्राहि मां सर्वगर्भश हरे संसारसागरात्॥ पुष्कराक्ष निमग्नोहं मायाविज्ञानमत्सरात्॥ त्राहि मां देवदेवेश
त्वत्तो नान्योस्ति रक्षिता॥ ततः विप्राय दक्षिणां दद्यात्कथां श्रुत्वा मनोरमाम्॥ ततश्च बंधुभिस्सार्द्धं विप्रेभ्यः प्रतिपादये
त्॥ प्रसादं भक्ष्यं इत्यान्नं च वाद्यादिकं चरेत्॥ ततो विप्रेभ्यो दक्षिणां दत्वा॰ शंखघंटादिभिर्वाद्यैः [illegible] अर्घ्यं प्रा
मयेत्॥ प्रणामं कृत्वा पूजां विसर्जयेत्॥ यस्य स्मृत्येति॰ कायेन वाचेत्यादि पठेत्॥ ॥इति सं[illegible] सत्यनारायण
व्रतपूजाविधिः॥ ॥अथ कथा॥ ॥[illegible]॥ ॥एकदा मुनयः सर्वे सर्वलोकहिते रताः॥ सुरम्ये नैमिषारण्ये

गोष्ठीं चक्रुर्मुनीश्वरास्तदा॥ तत्रांतरे महातेजा व्यासशिष्यो महायशाः॥ सूतः शिष्यगणैर्युक्तः समायातो हरिं स्मरन्॥ तमा
यातं समालोक्य स तु शास्त्रार्थपारगम्॥ मुनिः सर्वैः समुत्तस्थुः शौनकाद्यास्तपोधनाः॥ ॥ सोपि तान्सहसा भक्त्या मुनी
न्परमवैष्णवान्॥ नतो मदंडवद्भूमौ सर्वधर्मविदांवरः॥ वरासने महाबुद्धिस्तैर्दत्ते मुनिसत्तमैः॥ उवास सत्सो मध्ये सर्वैः
शिष्यगणैर्वृतः॥ तदोपविष्टं तं सूतं शौनको मुनिसत्तमः॥ बद्धांजलिरिमां वाचमुवाच विनयान्वितः॥ ८॥ शौनक उ
वाच॥ ॥ महर्षे सूत सर्वज्ञ कलिकाले समागते॥ केनोपायेन भगवन्हरिभक्तिर्भवेन्नृणाम्॥ कलौ सर्वे भविष्यंति पा
पकर्मपरायणाः॥ वेदविद्याविहीनाश्च तेषां श्रेयः कथं भवेत्॥ कलावस्मिन्गतप्राणा लोकाः स्वल्पायुषस्तथा॥ निर्द्र
नाश्च भविष्यंति नानापीडाप्रपीडिताः॥ प्रयाससाध्यं सुकृतं तंवास्तेषु दृश्यते द्विज॥ तस्मात्किंपि करिष्यंति कलौ न
म्रूकृतजनाः॥ सुकृतेषु विनष्टेषु प्रवृत्ते पापकर्मणि॥ सर्वे चाल्पधियः सर्वे गमिष्यंति दुराशयाः॥ स्वल्पश्रमेः स्वल्पकाले नि ४
स्वल्पवित्तेश्च सत्तम॥ यथा भवेन्महापुण्यं तथा कथय सत्तम॥ यस्योपदेशात्पुण्यं पापं वा कुरुते जनः॥ स तज्जागीभ
वेन्मर्त्य इति शास्त्रेण निश्चितम्॥ ॥ पुराणोपदेष्टा सदयः केतवेश्वविवर्जितः॥ पापापयेनविरोधी च चत्वारः केशवोपमाः राम:
॥ ज्ञानं संप्राप्य संसारे यः परेभ्यो न यच्छति॥ ज्ञानरूपहरिस्तस्मै प्रसन्नस्तु न मे क्वचित्॥ ज्ञानरूपेश्वरो नेश्वर परं संताय ४

CC-0. In Public Domain. Digitization by eGangotri

कृत्स्नः ॥ संक्षेपः श्रुमतेनैतं ज्ञानरूपधरो हरिः ॥१॥ शौनक उवाच ॥ ॥ केतेन तपसा किं वा प्राप्यते वा श्रुतं फलम् एतत्स
र्वं श्रोतुमिच्छामि कथयस्व महामते ॥ त्वमेव मुनिशार्दूल वेदवेदांगपारग ॥ त्वदृते नेह वक्तान्योऽयं तत्त्वं व्यासवा ९
सितः ॥१०॥ सूत उवाच ॥ ॥ धन्योऽसि त्वं मुनिश्रेष्ठ त्वमेव वैष्णवाग्रणीः ॥ यत्त्वस्मल्लोकानां हितं वांछसि सर्वदा ॥
शृणु शौनक वक्ष्यामि यत्त्वया श्रोतुमिष्यते ॥ नारदेनैवमुक्तस्तु भगवान्कमलापतिः ॥ सुरर्षये यथैवाह तच्छृ ९
णुध्वं समाहिताः ॥ एकदा नारदो योगी नरानुग्रहकांक्षया ॥ पर्यटन् विविधान् लोकान्मर्त्यलोकमुपागतः ॥ तत्र दृ
ष्ट्वा जनाः सर्वे नानादुःखसमन्विताः ॥ नानायोनिसमुत्पन्नाः क्लिश्यंते पापकर्मभिः ॥ केनोपायेन चैतेषां दुःखना
शो भवेद्ध्रुवम् ॥ इति संचिंत्य मनसा विष्णुलोकं गतस्तदा ॥ तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम् ॥ शंखचक्रधरं देवं व
नमालाविभूषितम् ॥ दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे ॥१५॥ नारद उवाच ॥ ॥ नमस्ते वाङ्मनोतीतरूपायानं
तशक्तये ॥ आदिमध्यान्तहीनाय निर्गुणाय गुणात्मने ॥ सर्वेषामादिभूताय भक्तानामार्तिनाशिने ॥ श्रुत्वा स्तो
त्रं ततो विष्णुर्नारदं प्रत्यभाषत ॥१७॥ श्रीभगवानुवाच ॥ ॥ किमर्थमागतोऽसि त्वं किं ते मनसि वर्तते ॥ कथयस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महाभागतत्सर्वंकथयामिते॥२८॥नारदउवाच॥ ॥मर्त्यलोकेजनाःसर्वेनानाक्लेशसमन्विताः॥नानायोनिसमुत्पन्नाःप
च्यन्ते पापकर्मणा॥२९॥तत्कथंशममेनाथलघूपायेनतद्वद॥श्रोतुमिच्छामितत्सर्वंकृपास्तियदितेमयि॥३०॥
श्रीभगवानुवाच॥ ॥साधुपृष्टंत्वयावत्सलोकानुग्रहकाम्यया॥यत्कृत्वामुच्यतेमोहात्तच्छृणुष्ववदामिते॥३१॥
व्रतमस्तिमहत्पुण्यंस्वर्गेचभुविदुर्लभम्॥तवस्नेहान्मयावत्सप्रकाशःक्रियतेऽधुना॥३२॥सत्यनारायणस्यैतद्व्रतंसम्यग्वि
धानतः॥कृत्वासद्यःसुखंभुक्त्वापरत्रमोक्षमाप्नुयात्॥तच्छ्रुत्वाभगवद्वाक्यंनारदःपुनरब्रवीत्॥किंफलंकिंविधानंचकृ
तंकेनैवतद्व्रतम्॥३४॥तत्सर्वंविस्तराद्ब्रूहियदाकार्यंहितद्व्रतम्॥ श्रीभगवानुवाच॥ ॥दुःखशोकादिशमनंधनधा
न्यविवर्द्धनम्॥सौभाग्यसंततिकरंसर्वत्रविजयप्रदम्॥३५॥यस्मिन्कस्मिन्दिनेमर्त्योभक्तिश्रद्धासमन्वितः॥सत्यनाराय
णंदेवंयजेत्तुहोनिशामुखे॥३६॥ब्राह्मणैर्बान्धवैश्चैवसहितोधर्मतत्परः॥नैवेद्यं ... भक्तितोदद्यात्सपादंभक्ष्यमु
त्तमम्॥३७॥रम्भाफलंघृतंक्षीरंगोधूमस्यचचूर्णकम्॥अभावेशालिचूर्णंवाशर्कराचगुडंतथा॥३८॥सपादंसर्वभ
क्ष्याणिचैकीकृत्यनिवेदयेत्॥विप्रायदक्षिणांदद्यात्कथांश्रुत्वाजनैःसह॥४०॥ततश्चबन्धुभिःसार्द्धंविप्रेभ्यम

राम:
५

CC-0. In Public Domain. Digitization by eGangotri

त्तिपादयन् ॥४०॥ प्रसादं भक्षयेद्भक्त्या नृत्यवाद्यादिकं चरेत् ॥ ततस्तैः स्वगृहं गच्छेत्सत्यनारायणं स्मरन् ॥ एवं कृत्वा मनु
ष्याणां वांछासिद्धिर्भवेद्ध्रुवम् ॥ विशेषतः कलियुगे नान्योपायोस्ति भूतले ॥४२॥ इति श्रीस्कन्दपुराणे रेवाखण्डे स
त्यनारायणव्रतोपाख्याने प्रथमोध्यायः ॥१॥ श्रीभगवानुवाच ॥ ॥ कथामस्य प्रवक्ष्यामि कृतं येन पुरा द्विज ॥ क
श्चित्काशीपुरे रम्ये आसीद्विप्रोतिनिर्द्धनः ॥ क्षुधातृष्णाकुलो भूत्वा सततं भ्रमते महीम् ॥ दुःखितं ब्राह्मणं दृष्ट्वा भग
वान्ब्राह्मणप्रियः ॥ वृद्धब्राह्मणरूपस्तं पप्रच्छ द्विजमादरात् ॥ किमर्थं भ्रमसे विप्र महीं नित्यं सुदुःखितः ॥४५॥ त
त्सर्वं श्रोतुमिच्छामि कथ्यतां यदि रोचते ॥ ॥विप्र उवाच ॥ ॥ब्राह्मणोतिदरिद्रोहं भिक्षार्थं संभ्रमे महीम् ॥४६॥ उपायं
यदि जानासि कृपया कथय प्रभो ॥ ॥वृद्धब्राह्मण उवाच ॥ ॥ सत्यनारायणो देवो वांछितार्थफलप्रदः ॥ तस्य त्वं वि
प्रपूजां कुरुष्व व्रतमुत्तमम् ॥ यत्कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः ॥ विधानं च व्रतस्यास्य विप्रायाभाष्य
सगतम् ॥ सत्यनारायणो वृद्धस्तत्रैवान्तरधीयत ॥ ततः प्रातः करिष्यामि व्रतं मनसि निश्चितम् ॥ इति संचिन्त्य विप्रोसौ रा
त्रौ निद्रां न लब्धवान् ॥५०॥ ततः प्रातः समुत्थाय सत्यनारायणव्रतम् ॥ करिष्येहं च संकल्प्य भिक्षार्थमगमद्द्विजः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्नेव दिने विप्रः प्रचुरं द्रव्यमाप्तवान् ॥ तेनैव बंधुभिः सार्द्धं सत्यस्य व्रतमाचरेत् ॥ सर्वदुःखविनिर्मुक्तः सर्वसंपत्समन्वितः ॥ बभ
व स द्विजः श्रेष्ठो व्रतस्यास्य प्रसादतः ॥ ततः प्रभृति कालं च मासि मासि व्यधारयत् ॥ एवं नारायणं देवं व्रतं ज्ञात्वा हि ज्ञोत्तमः ॥ सर्व
पापविनिर्मुक्तो दुर्लभं मोक्षमाप्तवान् ॥ व्रतं च तद्यथा विप्र पृथिव्यां संचरिष्यति ॥ ५५ ॥ तथैव सर्वदुःखं च नराणां च विनश्यति ॥ ॥
सूत उवाच ॥ ॥ एवं नारायणेनोक्तं नारदाय महात्मने ॥ ५६ ॥ मयापि कथितं विप्र किमन्यत्कथयामि ते ॥ ॥ इति श्रीस्कन्दपुरा
णे रेवाखण्डे नारदनारायणसंवादे सत्यनारायणव्रतोपाख्याने द्वितीयोध्यायः ॥ २ ॥ शौनक उवाच ॥ ॥ तस्माद्धि व्रतं केन पृ
थिव्यां चरितं मुने ॥ १ ॥ तत्सर्वं श्रोतुमिच्छामि श्रद्धास्माकं प्रजायते ॥ ॥ सूत उवाच ॥ ॥ शृणुध्वं मुनयः सर्वे व्रतं स्माधेन कृतं भुवि
॥ २ ॥ एकदा स द्विजवरो यथाविभवसंभवैः ॥ बन्धुभिः स्वजनैः सार्द्धं व्रतं कर्तुं समुद्यतः ॥ ३ ॥ एतस्मिन्नेव काले तु काष्ठक्रेता समागतः
बहिः काष्ठं च संस्थाप्य विप्रस्य मन्दिरं ययौ ॥ ४ ॥ तृष्णया परिपीडात्मा विप्रं दृष्ट्वा तथाविधम् ॥ प्रणिपत्य द्विजश्रेष्ठं किमिदं क्रिय
ते त्वया ॥ ५ ॥ कृते किं फलमाप्नोति विस्तराद्वद मे विभो ॥ विप्र उवाच ॥ ॥ सत्यनारायणस्येदं व्रतं सर्वेप्सितप्रदम् ॥ ६ ॥ दुःखशो
कादिशमनं सर्वत्र विजयप्रदम् ॥ धनधान्यसंततिकरं सर्वेषामीप्सितप्रदम् ॥ ७ ॥ यस्य प्रसादान्मे सर्वं धनधान्यादिकं महत् ॥ ततस्त
स्य व्रतं ज्ञात्वा काष्ठक्रेता तिहर्षितः ॥ पपौ जलं प्रसादं च भुक्त्वा तन्नगरं ययौ ॥ सत्यनारायणं देवं चिंतयन्स्थिरमानसः ॥ ८ ॥ काष्ठं विक्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पनगरेप्राप्यतेनायुपक्रमम्॥ तेनैवसत्यदेवस्यव्रतंसत्यकरोम्यहम्॥६॥ इतिसंचिंत्यमनसाकाष्ठंकृत्वातुमस्तके॥ जगामनगा
रेरम्येधनिनांयत्रसंस्थितिः॥ तद्दिनेकाष्ठमूल्यंचद्विगुणंप्राप्तवान्सः॥ ततःप्रसन्नहृदयःसुपक्वकदलीफलम्॥ शर्कराघृ
तसंयुक्तंगोधूमस्यचचूर्णकम्॥ प्रत्येकंचसपादंचगृहीत्वागृहमाययौ॥ ततोबंधून्समाहूयचकारविधिनाव्रतम्॥ तद्व्रत
स्यप्रसादेनधनपुत्रान्वितोभवत्॥१४॥ इहलोकेसुखंभुक्त्वाअंतेसत्यपुरंययौ॥१५॥ इतिश्रीस्कन्दपुराणेरेवाखण्डेसत्यव्र
तोपाख्यानेतृतीयोध्यायः॥३॥ सूतउवाच॥ ॥पुनरन्यत्प्रवक्ष्यामिशृणुध्वंमुनिसत्तमाः॥ आसीदुल्कामुखोनामनृपतिर्बलि
नांवरः॥ जितेन्द्रियःसत्यवादीययौदेवालयंप्रति॥ दिनेदिनेधनंदत्वाद्विजान्संतोषयन्सुधीः॥ भार्यातस्यप्रमुग्धाचसरोजवद
नासती॥ भद्रशीलासत्यव्रतंसिन्धुतीरेऽकरोन्मुने॥ एतस्मिन्नंतरेतत्रसाधुरेकःसमागतः॥ वाणिज्यार्थंबहुधनैःरत्नाद्यैः
परिपूरितः॥ नावंसंस्थाप्यतत्तीरेजगामनृपतिंप्रति॥४॥ दृष्ट्वातद्व्रतंसम्यक्पप्रच्छविनयान्वितः॥५॥ साधुरुवाच॥ ॥कि
मिदंकुरुषेराजन्भक्तियुक्तेनचेतसा॥ प्रकाशंकुरुतत्सर्वंश्रोतुमिच्छामिसांप्रतम्॥ ॥राजोवाच॥ ॥पूजनंक्रियतेसाधोविष्णो
रतुलतेजसः॥७॥ व्रतंचस्वजनैःसार्द्धंपुत्राद्यावाप्तिकाम्यया॥८॥ भ्रत्युवाचततोनत्वाराजानंमधुरंवचः॥ सांगंकथयमेराज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्व्रतमेतत्करोम्यहम्॥ ममापि संततिर्नास्ति मत्यमेतत्करोम्यहम्॥ ततो निवृत्य वाणिज्यात्सानन्दो गृहमागतः॥ भार्यायै क-
थितं सर्वं व्रतं च संततिप्रदम्॥ ८०॥ तदा व्रतं करिष्यामि यदा मे संततिर्भवेत्॥ स्यक्तिंचिद्दिवसे तस्य भार्या लीलावती सती॥
गर्भयुक्तानन्दचित्ता भवद्धर्मपरायणा॥ पूर्णे गर्भे ततो जाता बालिका चातिनिर्मला॥ दिने दिने वर्द्धमाना शुक्लपक्षे प-
था शशी॥ ततो वणिक्सुतायाश्च जातकर्मादिकं चरन्॥ नाम्ना कलावती चेति तन्नामकरणं कृतम्॥ ८४॥ ततो लीलाव-
ती प्राह स्वामिनं मधुरं वचः॥ न करोषि किमर्थं वा पुरा यत्प्रतिश्रुतम्॥ विवाहसमये ह्यस्याः करिष्यामि व्रतं प्रिये॥ इति भा-
र्यां समाश्वास्य जगाम नगरं प्रति॥ ततः कलावती कन्या वर्द्धिता पितृवेश्मनि॥ दृष्ट्वा कन्यां ततः साधुर्नगरे वंधुभिः सह॥ मं-
त्रयित्वा द्रुतं दूतं प्रेषयित्वा स्वधर्मवित्॥ विवाहार्थं च कन्याया वरं श्रेष्ठं विचारय॥ तेनाज्ञप्तश्च दूतोसौ कांचनं नगरं ययौ॥
तस्मादेकं वणिक्पुत्रं समादायागतो हि सः॥ दृष्ट्वा तं सुन्दरं बालं वणिक्पुत्रं गुणान्वितम्॥ ज्ञातिभिर्वंधुभिस्सार्द्धं परितुष्टे-
न चेतसा॥ दत्तवान्साधुराहूय कन्यां विधिविधानतः॥ ९०॥ ततो भाग्यवशात्तेन विस्मृतं व्रतमुत्तमम्॥ विवाहसमयेप्यस्या रा
स्तेन रुष्टोभवद्विभुः॥ ततः कालेन कियता निजधर्मविदाम्वरः॥ ९२॥ वाणिज्यार्थं गतः शीघ्रं जामात्रा सहितो वणिक्॥ २९

CC-0. In Public Domain. Digitization by eGangotri

त्नसारपुरेरम्येगत्वासिन्धुसमीपतः॥वाणिज्यंकुरुतेसाधुर्जामात्राश्रीमतासह॥पुरीनिर्म्मायनगरेंचन्द्रकेतोर्न्नृपस्यच॥ अद्य
एतस्मिन्नेवकालेतुसत्यनारायणःप्रभुः॥भ्रष्टप्रतिज्ञमालोक्यशापंतस्मैप्रदत्तवान्॥स्वयंप्रभ नियत्कालंमहद्दुः-
खंभविष्यति॥तस्मिन्नेवदिनेराज्ञोधनमादायतस्करः॥तेनैववर्त्मनायातःपृष्ठेदृष्टिंविलोकयन्॥तत्पश्चाद्धावका
न्दूतान्दृष्ट्वाभीतेनचेतसा॥धनंसंस्थाप्यतत्रैवगतःशीघ्रमलक्षितः॥ततोदूतास्समायातायत्रास्तेसज्जनोव
णिक॥दृष्ट्वानृपधनंतत्रबध्वाहृतावणिक्सुतौ॥हर्षयुक्ताधावमानाऊचुर्न्नृपसमीपतः॥तस्करौद्वौसमानीतौ
विलोक्याज्ञापयप्रभो॥तेनाज्ञप्तास्ततःशीघ्रंदृढंबध्वातुतावुभौ॥स्थापितौद्वौमहादुर्गेकारागारेविचारयन्ः
॥१०॥सूतउवाच॥ ॥माययासत्यदेवस्यनश्रुतंचतयोर्वचः॥ततस्तयोर्धनंयच्चगृहीतंचन्द्रकेतुना॥तच्छा-
पात्तयोर्गेहेभार्याचदुःखिताभवत्॥ ॥चौरेणापिहृतंसर्वंगृहेयच्चस्थितंधनम्॥आधिव्याधिसमायुक्ताक्षु
त्पिपासातिपीडिता॥अन्नचिंतापराभूत्वाभ्रमतेचगृहेगृहे॥ ॥तथाकलावतीकन्याभ्रमतेप्रतिवासरम्॥एक-
स्मिन्दिवसेरात्रौक्षुधार्त्ताद्विजमन्दिरम्॥गत्वापश्यद्व्रतंतत्रसत्यनारायणस्यच॥उपविश्यकथांश्रुत्वावरंयाचति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांछितम्॥ प्रसादभक्षणं कृत्वा ययौ राजा गृहं प्रति॥ ततो लीलावती कन्यां भर्त्सयामास तां भृशम्॥ ५१॥ पुत्रि रात्रौ
स्थिता कुत्र किं ते मनसि वर्त्तते॥ ५२॥ कन्यकोवाच॥ ॥ द्विजालये व्रतं मातर्दृष्टं वांछितसिद्धिदम् तच्छ्रुत्वा क-
न्यका वाक्यं व्रतं कर्त्तुं समुद्यता॥ ससुता सा वणिग्भार्या सत्यनारायणस्य च॥ व्रतं हि कुरुते साध्वी बन्धुभिः स्वजनैः
सह॥ भर्तृजामातरौ [illegible] प्रयागच्छेतां मम आश्रमम्॥ इति देववरं याचे सत्यदेवं पुनः पुनः॥ अपराधं च भर्तुर्मे जामातुः
क्षंतुमर्हसि॥ ६०॥ व्रतेनानेन तुष्टोऽसौ सत्यनारायणः प्रभुः॥ दर्शयामास स्वप्नं हि चन्द्रकेतुं नृपोत्तमम्॥ बंदिनौ
मोचय प्रातर्वणिजौ नृपसत्तम॥ देयं धनं च तत्सर्वं विधियुक्तं हृतं च यत्॥ नो चेत्त्वां नाशयिष्यामि सराज्यधनपुत्रकम्॥
एवमाभाष्य राजानं ध्यानगम्योऽभवत्प्रभुः॥ ततः प्रभातसमये राजा च स्वजनैः सह॥ उपविश्य सभामध्ये प्राह स्वप्नं
जनं प्रति॥ बद्धौ महाजनौ शीघ्रं मोचय द्वौ वणिक्सुतौ॥ इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ॥ समानीय नृ-
पस्याग्रे प्रोचुस्ते विनयान्विताः॥ आनीतौ द्वौ वणिक्पुत्रौ मुक्तौ निगडबंधनात्॥ ततो महाजनौ नीत्वा चन्द्रकेतुं
नृपोत्तमम्॥ ६६॥ नमस्कृत्वा च पूर्ववृत्तांतं विस्मयाद्भयविह्वलौ॥ राजा वणिक्सुतौ वीक्ष्य प्रोवाच सादरं वचः॥ देवा-

राम

५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वांप्रमहद्दुःखमिदानींनास्तितेभयम् ॥ इदानींमेर्वंभुक्तस्यंक्षौरकर्मादिकंचयत्नतः ॥ ततोनपाज्ञयासर्वंक्षौरकृ
त्यंसमाप्यच ॥ ७ ॥ शुक्लाम्बरधरोशीघ्रंसभामध्येसमागतो ॥ ततोनृपवरःश्रीमान्स्वर्णरत्नविभूषणैः ॥ अलंकृ
त्यवणिक्पुत्रोवचसागौरवेणमम ॥ ७ ॥ एतन्नीतंचयद्भुक्तंहिरण्यंदत्तवान् ॥ १२० ॥ मोवाचततोततोराजा
गच्छसाधोनिजावासम् ॥ राजानंप्रणिपत्याहगंतव्यंत्वत्प्रसादतः ॥ प्रायश्चित्तंकृत्वाततोसाधुर्मंगलाचारपूर्वक
म् ॥ ब्राह्मणायधनंदत्वासमयेनगारंययौ ॥ किंचिद्दूरंगतेसाधौसत्यनारायणःप्रभुः ॥ जिज्ञासांकृतवान्साधो
किमस्तितवनौतव ॥ ततोमहाजनोमत्तोहेलयाचप्रहस्यच ॥ कथंपृच्छसिभोदंडिन्मुद्रांकिंलब्धुमिच्छसि
॥ लतापत्रादिकंचैववर्ततेतरणौमम ॥ निष्ठुरंचवचःश्रुत्वासत्यंभवतुतेवचः ॥ एवमुक्त्वागतस्तीघ्रंदंडीत
स्यसमीपतः ॥ किंचिद्दूरंततोगत्वास्थितःसिन्धुसमीपतः ॥ गतेदंडिनिसाधुश्चकृतनित्यक्रियस्तदा ॥ उत्थि
तांतरणिंदृष्ट्वाविस्मयंपरमंययौ ॥ दृष्ट्वालतादिकंचैवमूर्छितोन्यपतद्भुवि ॥ लब्धसंज्ञोवणिक्पुत्रस्ततश्चिंता
परोभवत् ॥ जामातादुहिताकांतोवचनंचेदमब्रवीत् ॥ किमर्थंक्रियतेशोकंशापोदत्तश्चदंडिना ॥ शक्यतेतेन

CC-0. In Public Domain. Digitization by eGangotri

सर्वं हि कर्त्तुं हर्त्तुं न संशयः॥ अतस्त्वच्चरणं यामो वांछितार्थो भविष्यति॥३६॥ जामातृश्वशुरौ श्रुत्वा तत्सकाशं गत
स्तदा॥ दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम्॥ मयापराधात्मनादेव मुग्धो हतव मायया॥ यत्कृतं तद्वोना
पदोषं मे क्षन्तुमर्हसि॥ यतः परिहृतास्सर्वे क्षमासारा हि साधवः॥ पुनः पुनस्ततो नत्वा स एव शोकसंकुलः
तमुवाच ततो दण्डी विलपन्तं विलोक्य च॥ मा रोदीः श्रृणु मे वाक्यं मम पूजापराङ्मुखः॥ मा मा विज्ञाय दुर्बुद्धेल
व ब्धं दुःखं मुहुर्मुहुः॥ तच्छ्रुत्वा भगवद्वाक्यं स्तुतिं कर्त्तुं समुद्यतः॥३७॥ साधुरुवाच॥ त्वन्मायामोहितास्सर्वे ब्र
ह्माद्यास्त्रिदिवौकसः॥ न जानन्ति गुणान्रूपं तवाश्चर्यमिदं विभो॥ मूढोऽहं त्वां कथं जाने मोहितस्तव मायया॥
॥ प्रसीद पूजयिष्यामि यथा विभवसंभवैः॥ पुरा वित्तं च मच्चित्तं पाहि मां शरणागतम्॥ श्रुत्वा भक्त्यादितं वाक्यं प
रितुष्टो जनार्दनः॥ वरं च वांछितं दत्त्वा तत्रैवान्तरधीयत॥ ततोऽसौ नावमारुह्य दृष्ट्वा रत्नादिपूरिता॥ कृ
पया सत्यदेवस्य सिद्धं सर्वं च वांछितम्॥ इत्युक्त्वा स्वजनैस्सार्द्धं पूजां कृत्वा यथाविधि॥३८॥ हर्षेण महता
साधुः प्रयाणं चाकरोद्द्विजः॥३९॥ नावं संवाहयित्वा न स्वदेशमगमत्तदा॥ ततो जामातरं प्राह पश्य पश्य रत्नपुरीं मम॥ राम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दूतंसंप्रेषयामासनिजवित्तस्यरक्षणे॥ततोसौनगरंगत्वासाधुभार्यांविलोकयत्॥उवाचवांछितंवाक्यंनत्वाबध्वांजलिस्तदा॥
आगतेवंधुवर्गैश्चधनेर्वहुविधैस्तथा॥श्रुत्वाइतमुखाद्वाक्यंमहाहर्षयुतासती॥सत्यपूजांतथाकृत्वाप्रोवाचतनुजांप्र
ति॥व्रजामिशीघ्रमागच्छसाधुसन्दर्शनायच॥इतिमातृवचःश्रुत्वाव्रतंकृत्वासमाप्यच॥प्रसादंचपरित्यज्यगतासाचप
तिंप्रति॥तेनरुष्टःसत्यदेवोभर्त्तारंतरणिंतथा॥संहृत्यचधनैस्सार्द्धंजलेतस्मिन्नमज्जयत्॥ततःकलावतीदीनाआ
लोक्यचनिजंपतिम्॥शोकेनमहतातत्ररुदंतीचापतद्भुवि॥दृष्ट्वातथाविधांकन्यांनदृष्ट्वातत्पतिंतरिम्॥भीतेन
मनसासाधुःकिमाश्चर्यमिदंत्विति॥विचिंत्यमानास्तेसर्वेबभूवुस्तरिवाहकाः॥२५०॥ततोलीलावतीसाध्वीदृष्ट्वातांवि
ह्वलांसती॥२६॥विललापातिदुःखेनभर्त्तारंचेदमब्रवीत्॥इदानींनौकयासार्द्धंमहद्रूपोभूदलक्षितः॥नजानेकेन
देवेनहेलनयाचापहारितः॥सत्यदेवस्यमाहात्म्यंकिंज्ञातुंशक्यतेनहि॥इत्युक्त्वाविललापाथतत्रासस्वजनैस्सह॥
ततोलीलावतीकन्यांक्रोडेकृत्वारुरोदह॥ततःकलावतीकन्यानष्टेस्वामिनिदुःखिता॥गृहीत्वापादुकांतस्या

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऽनुगंतुं च मनो दधे ॥ कन्यार्थं रचितं दृष्ट्वा सभार्यस्स्वजनो वणिक् ॥ ५५ ॥ अतिलोकेन संतप्तश्चिंतयामास धर्मवित् ॥ कृतं हि स
त्यदेवेन भ्रांतोऽहं सत्यमायया ॥ सत्यपूजां करिष्यामि यथाविभवविस्तरैः ॥ इति सर्वान्समाहूय कथितं च मनोरथम् ॥ नत्वा
च दंडवद्भूमौ सत्यदेवं पुनः पुनः ॥ ततस्तुष्टः स देवोऽथ गगनाद्धरिजं प्रति ॥ जगाद वचनं चेदं नैवेद्यमवमन्य च ॥ आ
गता स्वामिनं द्रष्टुमतोऽदृश्योऽभवत्पतिः ॥ गृहं गत्वा प्रसादं चेद्भुक्त्वा चायाति सा पुनः ॥ लब्धभर्तृसुता साध्वी भविष्यति
न संशयः ॥ ६० ॥ ततश्च प्राणाहं वाक्यं श्रुत्वा गगनमंडले ॥ क्षिप्रं तदा गृहं गत्वा प्रसादं प्रतिगृह्य च ॥ अपश्यत्पुनरा
गत्य पतिं नावं जनैस्सह ॥ ६२ ॥ ततः कलावती हृष्टा जगाद पितरं प्रति ॥ एहि तात गृहं याहि विलंबं कुरुषे कथम् ॥
तच्छ्रुत्वा कन्यका वाक्यं संतुष्टोऽभूद्वणिक्स्वयम् ॥ पूजनं सत्यदेवस्य कृत्वा विधिविधानतः ॥ धनैर्बन्धुगणैस्सार्द्धं ज
गाम निजमन्दिरम् ॥ पौर्णमास्यां च संक्रांत्यां पूजां कृत्वा यथाविधि ॥ इह लोके सुखं भुक्त्वा चांते सत्यपुरं ययौ ॥ ६५
॥ ६५ ॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतोपाख्याने चतुर्थोऽध्यायः ॥ ४ ॥ सूत उवाच ॥ अथान्यत्स
वक्ष्यामि शृणुध्वं मुनिसत्तमाः ॥ आसीत्तुंगध्वजो राजा प्रजापालनतत्परः ॥ १ ॥ एकदा स वनं गत्वा हत्वा बहुविधान्प
CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गान॥ आगत्य वटमूलं च दृष्ट्वा सत्यस्य पूजनम्॥३॥ गोपाः कुर्वन्ति संतुष्टाः सत्यरूपीसनातनम्॥ राजा दृष्ट्वा तु दर्पे
ण न गतो न ननाम सः॥४॥ ततो गोपगणाः सर्वे प्रसादं न्यपसन्निधौ॥५॥ संस्थाप्य पुनरागत्य भुक्त्वा ते सर्वे यथेप्सितम्
ततः प्रसादं परित्यज्य राजा दुःखमवाप सः॥ तस्य पुत्रशतं नष्टं धनधान्यादिकं च यत्॥६॥ सत्यदेवेन तत्सर्वं नाशितं
मम निश्चितम्॥ अतस्तत्रैव गच्छामि यत्र देवस्य पूजनम्॥७॥ मनसा तु विनिश्चित्य ययौ गोपालसन्निधौ॥ ततो
ऽसौ सत्यदेवस्य पूजां गोपगणैः सह॥ भक्तिश्रद्धान्वितो भूत्वा चकार नृपसत्तमः॥ तत्प्रसादाद्धि संभोगाद्धन
धान्यसमृद्धवान्॥ एवं प्रभावोऽसौ देवस्य सत्यनारायणः प्रभुः॥ धनधान्यसुतारोग्यप्रदाता मोक्षदस्तथा॥ न किं
विद्यते लोके तस्मात्तस्य पूजनात्॥९॥ यदिदं कुरुते सम्यक् व्रतं परमदुर्लभम्॥१०॥ शृणोति च कथां पुण्यां
भक्तियुक्तः फलप्रदाम्॥ धनधान्यादिकं तस्य भवेत्सत्यप्रसादतः॥११॥ दरिद्रो लभते वित्तं बद्धो मुच्येत बन्धनात्॥
भीतो भयात्प्रमुच्येत सत्यमेतन्न संशयः॥१२॥ ईप्सितं च फलं भुक्त्वा चांते सत्यपुरं व्रजेत्॥ सूत उवाच॥ इति
वः कथितं विप्राः सत्यनारायणव्रतम्॥१३॥ यत्कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः॥ विशेषतः क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रियुगे सत्यपूजाफलप्रदा ॥१४॥ केचित्कालेवदिष्यंति सत्यमीशं तमेव हि ॥ सत्यनारायणं केचित्सत्यदेवं तथाप
रे ॥१५॥ नानारूपधरो भूत्वा सर्वेषामीप्सितप्रदः ॥ भविष्यति कलौ सत्यव्रतरूपी जनार्दनः ॥१६॥ य इदं पठते नित्यं
शृणोति मुनिसत्तमाः ॥ तस्य नश्यंति पापानि सत्यदेवप्रसादतः ॥१७॥ इति श्रीस्कन्दपुराणे रेवाखंडे सत्यना
रायणव्रतकथा समाप्ता ॥ श्री ॥ श्रीशाके १७७९ सम्वत् १९१४ श्रीसत्यनारायणायनमः ॥ ॥ श्री ॥

रामः
११

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६८३८

रामायणप्रयोगविधि

मूल्य रु. ५।-

बालकाण्ड	२२५०मुल्ल	२८८०टिका
अयोध्याकाण्ड	४३५०मुल्ल	५३५०टिका
आरण्यकाण्ड	२३५०मुल्ल	३१००
किष्किंधाकाण्ड	२३५०	२०००
सुन्दरकाण्ड	२७५०	२०००
युद्धकाण्ड	५५५०	४६००
उत्तरकाण्ड	३१००	३२००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा.पु
१

श्रीगणेशाय नमः॥ श्रीसीतारामाभ्यां नमः॥ श्रीहनुमतये नमः॥ ॥ अथ रामायण
प्रयोगविधिर्लिख्यते॥ तत्र प्रातराह्निकं भगवत्पूजानन्तरं अह्नावारात्रौवा कर्त्तव्यम्
तत्क्रमः पूर्वं विघ्नेशः पूजनं ततो वाल्मीकिपूजनं रामायणाय नम इति रामायणपूजनम्
चविधाय हनुमते आसनं दत्वा गन्धपुष्पाक्षतादिना संपूज्य एतान् श्लोकान् पठेत्॥ कूज
न्तं राम रामेति मधुरं मधुराक्षरं॥ आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥ १॥ वा
ल्मीकेर्मुनिसिंहस्य कवितावनचारिणः॥ शृण्वन् रामकथानादं को न याति परां गतिम्॥ २
यः पिबन् सततं रामचरितामृतसागरम्॥ अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम्॥ ३
गोष्पदीकृतवारीशं मशकीकृतराक्षसम्॥ रामायणमहामालारत्नं वन्देऽनिलात्मजम्
४॥ अञ्जनीनन्दनं वीरं जानकीशोकनाशनम्॥ कपीशमक्षहन्तारं वन्दे लंकाभयंकरं॥ ५

राम
१

रामः
११

CC-0. In Public Domain. Digitization by eGangotri

आभिषीकृतमार्त्तण्डं गोष्पदिकृतवारिधिम् । तृणीकृतदशग्रीवमाञ्जनेयं नमाम्यहम्
म् ॥ आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् । पारिजाततरुमूलवा
सिनं भावयामिपवमाननंदनम् ॥७॥ यत्रयत्ररघुनाथकीर्तनं तत्रतत्रकृतमस्त
कांजलिम् । बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥८॥ उल्लङ्घ्य सि
न्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः । आदाय तेनैव ददाह लङ्कां नमा
मि तम्प्राञ्जलिराञ्जनेयं ॥९॥ मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठ
म् ॥ वातात्मजं वानरयूथमुख्यं श्रीरामदूतं मनसा स्मरामि ॥१०॥ श्रीराघवं दशर
थात्मजमप्रमेयं सीतापतिं रघुकुलान्वयरत्नदीपम् । आजानुबाहुमरविन्ददलायता
क्षं रामं निशाचरविनाशकरं नमामि ॥११॥ वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रा·स्त्र
२

मध्येपुष्पसमासनेमणिमयेवीराशनेसुस्थितम्॥ अग्रेवाचयतिप्रभंजनसुतेतत्त्वंमुनि
भ्यः परंव्याख्यांतंभरतादिभिः परिवृतंरामंभजेश्यामलम्॥ १२॥ रामंरामानुजंसीतां
भरतंभरतानुजं॥ सुग्रीवंवायुसूनुंचप्रणमामिपुनःपुनः॥ १३॥ जयतिरघुवंशतिलकः
कौशल्याहृदयनंदनोरामः॥ दशवदननिधनकारीदाशरथिःपुंडरीकाक्षः॥ १४॥ वेदवे
द्येपरेपुंसिजातेदशरथात्मजे॥ वेदःप्राचेतसादासीत्साक्षाद्रामायणात्मना॥ १५॥ शृण्व
न्रामायणंभक्त्यायःपादंपदमेववा॥ सयातिब्रह्मणःस्थानंब्रह्मणापूज्यतेसदा॥ १६॥ यः
कर्णांजलिसंपुटैरहरहःसम्यक्पिबत्यादराद्वाल्मीकेर्वदनारविन्दगलितंरामायणाख्यं ॥ राम ॥
मधु॥ जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवं॥ संसारंसविहायगच्छतिपुमान्विष्णो ॥ २ ॥
र्पदंशाश्वतम्॥ १७॥ वाल्मीकिगिरिसंभूतारामसागरगामिनी॥ पुनातुभुवनंपुण्यारामाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रामहानदी ॥ १८ ॥ शोकशारसमाकीर्णां सर्गकल्लोलसंकुलम् । काण्डग्राहमहामीनं
वन्देरामायणार्णवम् ॥ १९ ॥ नद्धपगनसमाससंधियोगं सममधुरोपनतार्थवाक्य
बन्धम् । रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥ २० ॥ इति स्तो
कपठनोत्तरम् ॥ ॥ अस्य श्रीरामास्त्रमहामन्त्रस्य वाल्मीकिऋषिर्देवि गायत्री छंद
रिँ श्रीवीररामो देवता रां बीजं शक्तिः कीलकम् सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ इति
विनियोज्य ॥ धर्मात्मने हृदयाय नमः । सत्यव्रताय शिरसे स्वाहा । रामाय शिखायै वष
ट् ॥ दाशरथाय कवचाय हुं ॥ पौरुषेवाप्रतिद्वन्द्वाय नेत्राभ्यां वौषट् । शरौजहिरावणा
अस्त्राय फट् ॥ भूर्भुवः स्वरोमिति दिग्बंधः सहस्रादित्यसंकाशं सर्वशत्रुनिवर्हणम् ।
रामशक्तिमयं ध्यायेदमोघं रामसायकम् ॥ ॥ इति ध्यात्वा । धर्मात्मा सत्यसंधश्च रामो

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा.पु
३

दाशरथिर्यदि ॥ पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणि ॥ ॥ इति मन्त्रम् ततो दशवारा
न् जपित्वा उनन्यां सङ्कृत्वा ॥ भूर्भुवः स्वरोमिति विलोमेन दिग्विमोचनं कृत्वा ध्यानं य
ठित्वा ॥ ॥ लं पृथिव्यात्मने नारायणाय गन्धं विलेपयामि ॥ हं आकाशात्मने वासु
देवाय पुष्पम् ॥ यं वाय्वात्मने सङ्कर्षणाय धूपम् ॥ रं तेजोरूपिणे प्रद्युम्नाय दीपम्
वं अबात्मने ऽनिरुद्धाय नैवेद्यम् ॥ इति मानसोपचारैः संपूज्य रामायणपारायणं
कुर्यात् ॥ एतादृशविधिपूर्वकं पाठे क्रियमाणे बालकाण्डे सीतारामविवाहप्रसङ्गे
त्रिसप्ततितमसर्गे ॥ ॥ इयं सीता मम सुता सहधर्मचरी तव ॥ प्रतीच्छ चैनां भद्रं ते पाणिं ॥ राम ॥
गृह्णीष्व पाणिना ॥ इति षट्त्रिंशोत्तरार्द्धसप्तविंशपूर्वार्द्धमिलित्वेमं श्लोकं त्रिः पठित्वा राम ॥ ३ ॥
सहितां देवीमावाह्य षोडशोपचारैः संपूज्य ततः सुवासिनीं वस्त्रादिभिः संपूज्याशिष्ट

CC-0. In Public Domain. Digitization by eGangotri
